ॐ भूः भुवः सुवः भूर्भुवस्सुवः क्षीराधिदेवतामम्बिकामावाहयामि स्थापयामि पूजयामि।

पूर्वपदे-दधिक्राव्णोति दधि निधाय

त्रिणेत्रां चारुवदनां चतुर्दोर्दण्डमण्डिताम्।
रत्नाभरणसंयुक्तां नीलांशुकधरां शुभाम्।।
दिव्यगन्धानुलिप्ताङ्गी ध्यायेद्देवीं गणाम्बिकाम्।।

ॐ भूः भुवः सुवः भूर्भुवस्सुवः दध्यादिदेवतां गणाम्बिकामावाहयामि स्थापयामि पूजयामि।

दक्षिणपदे-शुक्रमसीत्याज्यं निधाय पूजयामि।

भुजद्वयान्वितां गङ्गा पाद द्वन्द्वेन संयुताम्।
सर्वाभरणसंयुक्तां चित्रावस्त्रसमन्विताम्।।

ॐ भूः भुवः सुवः भूर्भुवस्सुवः घृताधिदेवतां गङ्गामावाहयामि स्थापयामि पूजयामि।

उत्तरपदे-मधुवातेति मधु विन्यस्य

चतुर्भुजां द्विनेत्रा च हारकेयूरभूषिताम्।
पीताम्बरधरां गौरी सर्वालङ्कारसंयुताम्॥

ॐ भूः भुवः सुवः भूर्भुवस्सुवः मध्वधिदेवतां गौरीमावाहयामि स्थापयामि पूजयामि।

पश्चिमपदे-स्वादुःपवस्वेति शर्करां विन्यस्य
द्विनेत्रां सौम्यवदनां पीनोन्नतपयोधराम्।
चतुर्भुजां सुदीप्ताङ्गी रक्तवस्त्रसमन्विताम्॥
सर्वाभरणसंयुक्तां ध्यायेद्दवीं मनोन्मनीम्॥

ॐ भूः भुवः सुवः भूर्भुवस्सुवः शर्कराधिदेवतां मनोन्मनीमावाहयायमि स्थापयामि पूजयामि। इति संपूज्य क्षीरादिक्रमेण सद्योजातादि पञ्चब्रह्ममन्त्रैभ्यर्च्य-आग्नेयादिविदिक्षु हृदयमन्त्रेण कदळीं शिरोमन्त्रेण पनसं-शिखामन्त्रेण रसालं अस्त्रमन्त्रेण गन्धोदकं चाऽभ्यर्च्य धेनुमुद्रां शूलमुद्रां पद्ममुद्रां प्रदर्श्य प्रासादमन्त्रेण षोडशोपचारैः सम्पूज्य मूलेनाऽभिमन्त्र्य-अस्त्रेण संरक्ष्य कवचेनाऽवकुण्ठ्य ब्रह्माङ्गामन्त्राभ्यामभिमन्त्रयेत्॥

VII snapana (ceremonial bath for the deity):

स्नपनार्थं अस्त्रमन्त्रेण भूमिं संशोध्य वामदेवेन गन्धजलेन अनुलिप्य तस्योपरि चतुः प्रस्थपरिमितव्रीहितण्डुलतिलैः तत्पुरुषेण गायत्र्या च स्थण्डिलत्रयें प्रत्येकमुपर्युपरि विन्यस्य तदुपरि पद्ममालिख्य शिवगायत्र्या पद्मासनमभ्यर्च्य-आपोहिष्ठेति कलशान् प्रक्षाल्य-अस्त्रेण धूपदीपौ दत्वा गन्धद्वारामिति चन्दनपङ्केनानुलिप्य तन्तु तन्वन्निति सूत्रेणावेष्ट्य आकलशोष्विति पद्ममध्ये कलशान्निध

ाय सुगन्धद्रव्यैरन्वितेन तोयेनाऽस्त्रेणाऽपो व इदगँ सर्वमिति द्वाभ्यां सम्पूर्य हिरण्यरूपेति हिरण्यं स्वाद्धीन्त्वेत्यनेन गायत्र्या-अस्त्रेण च कूर्चं हृदयेन पल्लवान् शिखामन्त्रेण नारिकेलं कवचेन वस्त्रयुग्मं गन्धद्वारामिति गन्धं योऽपां पूष्पमिति पुष्पमालां च समर्प्य आधारशक्त्यादिभिः मनोन्मन्या समन्वितं शिवमावाह्य गन्धादिभिरभ्यर्च्य द्विकुम्भपक्षे-मध्येन्द्रादिक्रमेण ईशानादि पञ्चमूर्तेः। नवकलशपक्षे-इन्द्राद्यष्टदिक्षु-अनंताद्यष्टविद्येशान् मध्ये शिवं चावाह्य गन्धादिभिरभ्यर्च्य त्वमग्ने रुद्रमन्त्रेण शिवकुम्भं गौरीमिमायेति वर्धनीं च संस्पृश्य शूलमुद्रां योनिमुद्रां च दर्शयित्वा प्रासादमन्त्रमष्टोशतवारं गौरीगायत्रीमष्टवारं जप्त्वा द्राक्षाखर्जूरजम्बीरनारिकेलोदकानि जम्ब्वास्त्र कुशनारङ्गपनसेक्षुरशांश्च हृदयाद्यैरभिमन्त्र्य पुरुषसूक्तं पञ्चास्त्राणि च जप्त्वा धेनुमुद्रां महामुद्रांचास्त्रेण दर्शयित्वा सामान्यार्घ्यतोयेन पवमानसूक्तेन सर्वद्रव्याणि प्रोक्षयित्वा साष्टाङ्ग प्रणाम्य पुष्पाञ्जलिना।

शास्त्रोचितमिदं चास्तु स्नपनं देव निर्मितम्।
अनेन स्नपनेनास्तु प्रसन्नो भगवान् हरः॥

आधिवासः कृतो देव स्नपनाय मया तव।
क्षणेन मे प्रसादोऽयं क्रियतां परमेश्वर॥

इत्येवं प्रार्थयेदित्ति स्नपनक्रमः।

VIII ātmārcana (regarding oneself as the very deity, eschewing the notion that he is mere man)

सामान्यार्घ्यतोयेनास्त्रमन्त्रेण स्वशिरसि सम्प्रोक्ष्य स्वासने ॐ हां शिवासनाय नमः। इति पुष्पं दत्वा। हृदये-ॐ हां हं हां शिवमूर्तये नमः। इति मूर्तिं विन्यस्य। ललाटे-हरिश्चन्दनेन तिलकं कृत्वा। शिरसि-ॐ हां हौं शिवाय नमः। इति

पुष्पमारोप्य आत्मनि पशुबुद्धिं त्यक्त्वा शिवोऽहमिति भावयेदित्यात्मार्चनम्॥

XI Mantra-śuddhi (purification of the mantra employed)

हृद्यञ्जलिं बध्वा, बिन्द्वन्तं ब्रह्मरन्ध्रान्तं शिखान्तं वा ह्रस्वदीर्घप्लुतप्रणवादि नमोन्ततया क्रमेण त्रिवारं शनैः मूलमन्त्रोच्चारणं कृत्वा, ब्रह्माङ्गानि प्रासादं शिवबीजञ्चापि एवमेवोच्चारणं कुर्यात्॥

इत्थं मन्त्रशुद्धिं विधाय तदनन्तरं परिवारदेवतासद्भावे तदर्चनं कुर्यात्।

X Saurārādhana

पूजोपकरणान्युपाहृत्य इन्द्राग्न्योर्मध्ये चैशान्ये वा सूर्याग्रे चोत्तराभिमुख आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य-एवं गुणविशेषणविशिष्टायां (आस्यां) शुभतिथौ श्रीपरमेश्वरप्रीत्यर्थं सौरादिचण्डान्तमाराधनं करिष्यमाणः सन् आदौ सौरार्चनं करिष्य इति सङ्कल्प्य।

ॐ रः अस्त्राय फडिति हस्ततततलपृष्ठे संशोध्य
ॐ ह्रां ह्रीं सः शिवसूर्याय वौषडिति- आप्लाव्य
तर्जनीभ्यामङ्गुष्ठयोः ॐ अं हृदयाय नमः।
कनिष्ठिकानामिकामध्यमासु-अङ्गुष्ठाभ्यां- ॐअं
अर्काय शिरसे नमः।
ॐ अं भूर्भुवस्सुवरों ज्वालिनीशिखायै नमः।
ॐ अं ह्रूं कवचाय नमः।

हस्ततलयोर्मध्यमाङ्गुलिभ्यां ॐ भां भानुनेत्राभ्यां नमः।

तर्जन्योरङ्गुष्ठाभ्यां-ॐ रः आस्त्राय नमः- इति विन्यस्य

कवचाय नमः- इत्यवकुण्ठ्य उभौ संयोज्य- ॐ सूर्याय वौषडिति विन्यस्य

कवचाय नमः इत्यवकुण्ठ्य उभौ संयोज्य-ॐ सूर्याय वैषडिति विन्यस्य

दक्षिणाङ्गुष्ठकनिष्ठिकाभ्यां हृदि-ॐ ह्रां हृदयाय नमः।

दक्षिणाऽङ्गुष्ठाऽनामिकाभ्यां मूर्ध्नि-ॐ ह्रीं शिरसे नमः।

दक्षिणाऽङ्गुष्ठमध्यमाभ्यां शिखायां-ॐ ह्रूं शिखायै नमः।

दक्षिणाऽङ्गुष्ठतर्जनीभ्यां कण्ठप्रावरणत्वेन स्तनमध्यान्तं ॐ ह्रैं कवचाय नमः।

मध्यमातर्जनीभ्यां नेत्रे ॐ ह्रौं नेत्राभ्यां नमः।

मध्यमातर्जनीभ्यां हस्ततलयोः- ॐ ह्रः अस्त्राय नमः। इति दशदिक्षु छोटिकायाऽस्त्रेण दिग्बन्धनं विधाय महामुद्रया सर्वाङ्गेषु विन्यस्य स्वतनुं सूर्यरूपं भावयेत्।

ततोऽर्घ्यपात्रमस्त्रेण संशोध्य ललाटमध्यस्फुरदरुणबिन्दु विनिःसृतामृतधारया ओं खंषोल्काय नमः। इति गन्धोदकेनाऽऽपूर्य ततः षडङ्गैर्मूलमन्त्रेण च सम्पूज्य अस्त्रेण संरक्ष्य कवचेनाऽवकुण्ठ्य मूलन धेनुमुद्रयाऽमृतीकृत्य तज्जलेनाऽस्त्रय इति मन्त्रेण पूजाद्रव्यमात्मानं द्वारां च सम्प्रोक्ष्य

पुष्पक्षेपेणाऽस्त्राय नमः। इति मन्त्रेण विघ्नानुच्चाट्य द्वारं सम्प्रोक्ष्य

द्वारदक्षिणवामपर्श्वयोः-ओं अं दण्डिने नमः। ओं अं पिङ्गलाय नमः

पद्मस्यैशान्यां ओं अं गणपतये नमः
पद्मस्याग्नेय्यां ओं अं गुरुभ्यो नमः
मध्ये- ओं प्रभूतासनाय नमः इत्यभ्यर्च्य
आग्नेयादि चतुष्कोणेषु- ओं हां विमलाय नमः।
ओं हां साराय नमः
ओं हां आराध्याय नमः
ओं हां परमसुखाय नमः
इति सितरक्तपीतहरितसिंहरूपाणि ध्यात्वा
तदुपरि- ओं अं
पद्माय नमः। इति श्वेतपद्ममभ्यर्च्य पद्मामुद्रां प्रदर्श्य
तस्य पूर्वादीशान्तकेसरेषु- ओं रां दीप्तायैनमः
ओं रीं सूक्ष्मायै नमः
ओं रुं जयायै नमः
ओं रें विभूत्यै नमः
ओं रों अमोघायै नमः
ओं रौं वैद्युतायै नमः
कर्णिकायां- ओं रः सर्वतोमुख्यैः नमः।
इति सम्पूज्य विस्फुरमुद्रां प्रदर्श्य
ओं रं अर्कासनाय नमः। इति- अर्कासनं सम्पूज्य
ओं खं खषोल्काय सूर्यमूर्तये नमः-
इत्यासनोपरि मूर्तिं विन्यस्य

ओं भां भानुनेत्राभ्यां नमः इति नेत्रे दत्वा पुष्पैञ्जलिमापूर्यललाटा कृष्टस्फुरदरुणबिम्दुमञ्जलौ विचिन्त्य

ओं ह्रां ह्रीं सः शिवसूर्याय नमः इति मूलेनाऽऽवहिनीमुद्रया-आवाह्य स्थापनादिपञ्चमुद्राः प्रदर्श्य धूपदीपाद्यर्घ्याणि दत्वा ध्यायेत्-

धवलाम्भोरुहारूढं दाडिमीकुसुमप्रभम्।
स्फुरद्रत्न महातेजो वृत्तमण्डलमध्यगम्॥
आदित्यं सर्वकर्तारं कलाद्वादशसंयुतम्।
पद्महस्तद्वयं वन्दे सर्वलोकैकसाक्षिणम्॥

इति ध्यात्वा-आसत्येनेति मन्त्रं जप्त्वा

भास्करायेति सूर्यगायत्रीं जप्त्वा- अङ्गानि सम्पूज्य पाद्यर्घ्याचमनीयानि दत्वा बिम्बं शूद्धजलेनाऽभिषिच्य पुनस्तैलादिसकलद्रव्योपचारैः- आभिषिच्य- अलङ्कृत्य मूलेन-अष्टोत्तरशतनामभिश्चाभ्यार्च्य बिम्बमुद्रां प्रदर्श्य तत्पार्श्वयोः उषाप्रत्यूषाञ्चाभ्यर्च्य-आवरणार्चनं कुर्यात्॥

प्रथमावरणे- अग्नेय्यां- ओं ह्रां हृदयाय नमः
नैरृत्यां ओं ह्रीं शिरसे नमः
वायव्यां ओं ह्रूं शिखायै नमः
ऐशान्यां- ओं ह्रौं कवचाय नमः
दिग्दलेषु- ओं ह्रः अस्त्राय नमः
प्रथमावरणपूजां समर्पयामि।

(2) द्वितीयावरणे-
पूर्वादिचतुर्दलेषु- ओं हां सं सोमाय नमः
ओं हां बुं बुधाय नमः
ओं हां बृं बृहस्पतये नमः
ओं हां भं भार्गवाय नमः
आग्नेयादि कोणदलेषु- ओं हां अं

अङ्गरकाय नमः
ओं हां शं शनैश्चराय नमः
ओं हां रं राहवे नमः।
ओं हां कं केतवे नमः
द्वितीयावरणपूजां समर्पयामि।

(3) तृतीयावरणे-

पूर्वाद्यष्टदिक्षु ऊर्ध्वेऽधश्च- ओं हां इन्द्राय नमः
ओं हां अग्नये नमः
ओं हां यमाय नमः
ओह हां निरुऋतये नमः
ओं हां वरुणाय नमः
ओं हां वायवे नमः
ओं हां सोमाय नमः
ओं हां ईशानया नमः
ओं हां ब्रह्मणे नमः
ओं हां विष्णवे नमः

तृतीयावरणपूजां समर्पयामि।

ततः धूपदीपनैवेद्यादिकं दत्वा यथाशीक्ति मूलमन्त्रं जप्त्वा प्रार्थयेत्।
''दण्डाद्यैस्सेव्यमानो
विमलमुखचतुस्सिंहपद्मासनस्थो
दीप्ताद्यैः शक्तिजालैररुमणिरुचिः
श्रीखषोल्कार्कमूर्तिः।
साङ्गस्वाङ्गग्रहर्क्षप्रमुखपरिवृतः श्वेतपद्माधिरूढो

श्वेताब्जः सद्विहस्तः शुभनयनयुगः
शम्भुसूर्योऽवतान्नः॥

इति स्तुत्वा नमस्कृत्य

ओं खं खषोल्काय स्वाहेति मन्त्रेण पराङ्मुखार्घ्यं दत्वामस्वेत्यभिधाय सूर्यमूर्तिं मूलेन हृदये न्यसेत्।

अनन्तरमैशान्यां तद्वामे-ओं अं
तेजश्चण्डासनाय नमः।
ओं अं तेजश्चण्डमूर्तये नमः।
ओं अं तोजश्चण्डाय नमः।

इति सम्पूज्य

चण्डं रक्तं करालास्यामब्जाभय करद्वयम्।
दंष्ट्राकरालदीत्पास्यं जटिलं रक्तवाससम्॥

इति विभावयन् ओं अं तेजश्चण्डाय नमः। इति सम्पूज्य निर्माल्यं निवेद्य विसृजेत्।

THE SECOND SEUENCE

I Preliminaries

(a) Worship of Gaṇeśa for successful completion of the undertaking (viz. Śivārcanā)

अथ गुरुः- श्री गणेशसन्निधिमुपगम्य सौम्यास्य उपविश्य घण्टां सन्ताड्य-आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य शुभतिथौ श्रीपरमेश्वरप्रीत्यर्थं महागणपतिप्रसादेन निर्विघ्ने-नोत्तराभिवृध्यर्थ श्री महागणपतिपूजां करिष्य इति सङ्कल्प्य सकलीकृत्य

ओं गां सर्वेश्वराय नमः इति शिरसि।
ओं गीं गजमुखाय नमः इति मुखे।
ओं गूं विघ्नहन्त्रे नमः इति नेत्रयोः।
ओं गौं स्कन्दप्रियाय नमः- इति भुजयोः।
ओं गः पाशाङ्कुशहस्ताय नमः- इति हस्तयोः
ओं गां गणनाथाय नमः- इति हृदये।
ओं गीं लम्बोदराय नमः- इति उदरे।
ओं गैं हेरम्बाय नमः- इति कट्यां।
ओं गैं आखुवाहनाय नमः- इति ऊर्वोः।
ओं गों विघ्नेश्वराय नमः- इति जान्वोः।
ओं गः गणेश्वराय नमः- इति पादयोः।

इत्येवं विन्यस्य पुनः-

ओं गणानां त्वा गणपतिं हवामहे। गों ईशानमूर्ध्ने नमः- इति शिरसि

ओं कविं कवीनाम्। गं तत्पुरुषवक्त्राय नमः- इति वक्त्रे ओं उपश्रवस्तमम्। गूं अघोरहृयाय नमः- इति हृदये

ओं ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पते। गीं वामदेवगुह्याय नमः- इति गुह्ये

ओं आ. नः श्रृण्वन्नूतिभिस्सीद सादनम्। गं सद्योजातपादभ्यां नमः। इति पादयोः

ओं गं हृदयाय नमः
ओं गीं शिरसे नमः
ओं गूं शिखायै नमः

ओं गैं कवचाय नमः
ओं गौं नेत्रत्रयाय नमः
ओं गः अस्त्राय नमः

इत्येवं पञ्चब्रह्मषडङ्गान् विन्यसेत्। इति व्यापकन्यासं कृत्वा पाद्यार्घ्याचमनीयपात्राणि पूर्वोक्तवत्परिकल्प्य स्नपनान्तं विधाय सामान्यार्घ्योदकेन द्वारं ओं हां शिवास्त्रय नमः- इति सम्प्रोक्ष्य

द्वारस्योर्ध्व भागे दक्षिणे-ओं गं गणपतये नमः।
उत्तरे-ओं सं सरस्वत्यै नमः
मध्ये-ओं मं महालक्ष्म्यै नमः
ओं भुवङ्गाय नमः
ओं पतङ्गाय नमः
ओं कूष्माण्डाय नमः
ओं कुण्डोदाराय नमः
सर्वोभ्यो गणेशद्वारपालेभ्यो नमः।

इति सम्पूज्य विनायकस्याग्रे ओं मं महामूषकया नमः इति नैवेद्युपचारं विधाय अन्तर्गत्वा

नैर्ऋत्यां- ओं हां वस्तुदेवाय नमः।
वारुण्यां- ओं हां सरस्वत्यै नमः।
वायव्यां- ओं हां महालक्ष्म्यै नमः।
अग्नेय्यां- ओं हां समृध्यै नमः।
ऐशान्यां- ओं हां विजयाय नमः।

इति सम्पूज्य

चिंन्तामणिपिठे- ओं हां अधारशक्त्यै नमः।
ओं हां अनन्तासनाय नमः।

आसनस्याग्नेयादि विदिंक्षु- ओं हां धर्माय नमः

ओं हां ज्ञानाय नमः।

ओं हां वैराग्याय नमः।

ओं हां ऐश्वर्याय नमः।

पीठमध्ये उपर्युपरि क्रमेण- ओं हां कन्दाय नमः।

ओं हां बीजाय नमः।

ओं हां अङ्कुराय नमः।

ओं हां नाळाय नमः।

ओं हां दलेभ्यो नमः।

ओं हां केसरेभ्यो नमः।

ओं हां कर्णिकायै नमः।

ओं हां पद्माय नमः।

प्रागादि- ओं तीव्रायै नमः।

ओं ज्वालिन्यै नमः।

ओं नन्दायै नमः।

ओं भोगदायै नमः।

ओं कामरूपिण्यै नमः।

ओं उग्रायै नमः।

ओं तोजोवत्यै नमः।

ओं सत्यायै नमः।

मध्ये-ओं विघ्नाशिन्यै नामः।

ओं ह्रींग सर्वशक्तिकमलासनाय नमः।

ओं हां गणपत्यासनाय नमः।

ओं हां गणपतिमूर्तये नमः।

ओं हां विद्यादेहाय नमः

उत्तरे उच्छिष्ठगणपतये नमः।

ओं रक्तगणपतये नमः।

अग्नेय्यां- ओं क्षिप्रगणपतये नमः।

ओं हेरम्बगणपतये नमः।

ओं लक्ष्मीगणपतये नमः।

ओं विजयगणपतये नमः।

ऐशान्यां- एं महागणपतये नमः।

ओं हरिद्रागणपतये नमः।

तृतीयावरणपूजां समर्पयामि।

(4) चतुर्थावरणपूजां करिष्ये।

अग्नेय्यां- सन्तानतरुमूले ओं सरस्वतिसमेताय ब्रह्मणे नमः।

नैऋत्यां- मन्दारतरुमूले ओं लक्ष्मीसमेताय विष्णवे नमः।

वायव्यां- कल्पतरुमूले ओं भवानीसमेताय महेश्वराय नमः।

ऐशान्यां- चन्दनतरूमूले ओं रतीसमेताय कामदेवाय नमः

चतुर्थावरणपूजां समर्पयामि।

(5) पञ्चमावरणपूजां करिष्ये।

पूर्वाद्यष्टदिक्षु क्रमेण- ओं वज्रायुधायेन्द्राय नमः।

ओं शक्त्यायुधायाग्नये नमः।

ओं दण्डहस्ताय यमाय नमः।
ओं खड्‌गहस्ताय निरृतये नमः।
ओं पाशहस्ताय वरुणाय नमः।
ओं अङ्‌कुशधारिणे वायवे नमः।
ओं गदाधराय सोमाय नमः।
ओं त्रिशूलपाणये ईशानाय नमः।

ऊर्ध्वे- ओं पद्मसहिताय ब्रह्मणे नमः।
अधः- ओं चक्रहस्ताय विष्णवे नमः।

पञ्चमावरणपूजां समर्पयामि।

अथाऽष्टोत्तरशतनामभिः सहस्रनामभिश्च सम्पूज्य धूपदीपै दत्वा नारिकेल रम्भाफलादि नानाफलानि नानाविध ान्नमोदकलड्‌डुकाऽपूपादीन् निवेद्य नीराजनादि सर्वोपचारान् कृत्वा गणेशालये पृथक् स्थिते सति- द्वारपालमूषकादीनां अष्टदिग्वेवतानाञ्च बलिं दत्त्वा। महाबलिपीठे- ओं सर्वविघ्नगणरूपाय नमः। इत्यभ्यर्च्य ओं सर्वविघ्नगणरूपेभ्यस्स्वाहा इति बलिं गत्वा अग्रे-निरोधार्घ्यं दत्वा सर्वोपचारान् कृत्वा।

"वक्रतुण्ड महाकाय सूर्यकोटिसम्प्रभ।
अवघ्निं कुरु मे देव पूजाकार्येषु सर्वदा॥"

इति सम्प्रार्थयेत्॥

(b) **Dvāra-yajana** (worship of the door-deities and obtaining their permission to enter the sanctum.

According to *Kāmikāgama*, the deities in the doorway (dvāradeva), are Pataṅga (on top), Bhuvaṅga (at the bottom) Gaṇeśa (on top of Pataṅga), Sarasvati (to the left of Ganesa), and Mahālakṣmī (in the middle above Patanga, Gaṇeśa on one Side and Sarasvati on

the other), and Yamunā Mahākāla (to the left of Bhuvanga).

अथाचार्योऽस्त्रपञ्जरमध्यस्थमात्मानं विभाव्य पृथिव्यादिमायान्तैक-विंशत्तत्त्ववर्गं मनसाऽतिलङ्घ्य शिवपूजार्थं गर्भ गेहद्वारमासाद्य पूर्वासादित सामान्यार्घ्योदकेन शिवद्वारमस्त्रेण सम्प्रोक्ष्य द्वारोर्ध्वदक्षिणे- ओं हां गणपतये नमः

लम्बोदरं श्यामनिभं गणेशं
कुठारमक्षस्त्रजमूर्ध्वकाभ्याम्। सलड्डुकं
दन्तमधः कराभ्यां वामेतराभ्यां च दधानमीळे॥

महागणपतिं पूजयामीति सम्पूज्य
तदुत्तरे- ओं हां सरस्वत्यै नमः।

मणिक्यमुकुटामक्षमालां पुस्तकधारिणीम्।
स्वच्छस्फटिकसङ्काशां चिन्तयामि सरस्वतीम्॥

सरस्वतीं पूजयामीति सम्पूज्य
मध्ये- ओं हां महालक्ष्म्यै नमः।

वामदक्षिणहस्ताभ्यां दधतीं श्रीफलाम्बुजे।
हेमाभ्यां सघटेभ्यां प्लाव्यमानां महोज्ज्वलाम्॥

महालक्ष्मीं पूजायमीति सम्पूज्य
द्वारदक्षिणपार्श्वे- ओं हां निन्दिने नमः।

चामीकराजलप्रख्यं सर्वाभरणभूषितम्।
बालेन्दुमुकुटं सौम्यं त्रिनेत्रं च चतुर्भुजम्॥

दीप्तशूलमृगीटङ्कहेमवेत्रधरं विभुम्।
चन्द्रबिम्बाभवदनं हरिवक्त्रं च नन्दिनम्॥

नन्दिनं पूजयामीति सम्पूज्य
तद्दिणे- ओं हां गङ्गयै नमः।

मकरासनगां गङ्गा सव्यवामकरद्वये।
नीलोत्पलं पूर्णकुम्भं दधतीं शुद्धविग्रहाम्॥

गङ्गा पूजयामीति सम्पूज्य
द्वारवामपर्श्वे- ओं हां महाकालाय नमः।

कृष्णं त्र्यक्षं महाकालं सव्यवामकरद्वये।
कपालं च त्रिशूलं च दधानं विकटाननम्॥

महाकालं पूजयामीति सम्पूज्य
द्वारोर्ध्वशिलायां- ओं हां पतङ्गाय नमः।
द्वाराधः शिलायां - ओं हां उत्कराय नमः।
दक्षिणस्तम्भे- ओं हां अभिधानाय नमः।
वामस्तम्भे- ओं हां विमलाय नमः।
दक्षिणकवाटे- ओं हां सुबाहवे नमः।
उत्तरकवाटे- ओं हां सुबाहवे नमः।
सुषिरे- ओं हां नवशक्तिभ्यो नमः।
आधारे- ओं हां अस्त्राय नमः।

दक्षिणद्वारभित्तिपार्श्वे-

अस्त्रद्वारपालाय- ओं हां डिण्ड्यासनाय नमः
ओं हां डिण्डिमूर्तये नमः।
ओं हां डिण्डिने नमः।
उत्तद्वारभित्तिपार्श्वे-

अस्त्रद्वारपालाय- ओं हां मुण्ड्यासनाय नमः।

ओं हां मुण्डिमूर्तये नमः।
ओं हां मुण्डिने नमः।

इति अभ्यर्च्य

पश्चादन्तरालमण्टपे वाऽग्ने स्थितं वृषभं सामान्यार्घ्यतोयेन

सम्प्रोक्ष्य ओं हां वृषभेश्वरासनाय नमः।
ओं हां वृषभेश्वरमूर्तये नमः।
ओं हां वृषभेश्वराय नमः।

इत्यासनमूर्तिमूलैरभ्यर्च्य

रजतनिभशरीरं देवपादं मुखोर्ध्वं
अरुणितशुभश्रृङ्गचाग्निवार्णं त्रिणेत्रम्।
गलशुभमणिमालं किङ्किणीदामभूषं
हरिहरविधिरूपं चादिदेवं वृषेशम्॥

इति ध्यात्वा- यस्सुश्रृङ्गस्सुवृषभेति मन्त्रेणाऽवाह्या।

तीक्ष्णश्रृङ्गयेति वृषभगायत्र्या सम्पूज्य अर्घ्यं दत्वा सर्वेभ्यो द्वारपालेभ्यो नमः।

वेदान्तवेद्योऽखिल विश्वमूर्ते विभो विरूपाक्ष विशेषवेद्य।
विश्वेश्वराऽशेषविशेषमूर्ते कवाटमुद्घाटय कालकाल॥

इति सम्प्रार्थ्य अस्त्रमन्त्रेण कवाद्घाधटनं कृत्वा त्रिविधविघ्नानुत्सारयेत्।

(c) Vighnodvāsana, for eliminating the three kinds of obstacles and impediments: celestial, terrestial interpatial. This is followed by the ringing of the bell.

द्वारसमीपे दिव्यान्तरिक्षभूमिष्ठान् ओं हां शिवाय नाम इति दिव्यदृष्ट्यवलोकनेन दिव्यान्- ओं हः अस्त्राय हुं फटिति नाराचमुद्रया पुष्पं मूर्ध्नि क्षिप्त्वा अन्तरिक्षगान् दक्षिणपादाङ्गुष्ठेन त्रिवारं भूमिं ओं श्लीं पशुं पाशुपतास्त्राय हुं फटिति ताडनेन भूमिष्ठान्- इति त्रिविधविघ्नानुत्सार्य विघ्नत्रयोच्चाटनार्थं पञ्चवाद्यघोषपुरस्सरं-

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम्।
कुर्वे घण्टारवं तत्र देवताह्वानलाञ्छनम्॥

ओं श्ली पशुं पाशुपतास्त्राय हुं फडिति घण्टां त्रिस्ताडयेत्॥

(d) Yavanikotsāraṇa: The ritual of drawing aside of the curtain of the sanctum.

अथ प्रच्छन्नपटं ओं हां हृदयाय नमः। इत्युत्सार्य ओं हां स्थाणवे नमः।

नीलवाजिसमारूढं वस्त्रमाल्यविभूषणम्।
निद्राच्छादितलोकं तं भजे खट्वाङ्गधारिणम्॥
इति ध्यात्वाऽभ्यर्च्य
अन्तः प्रवेशे शिवदर्शने च शिवार्चने तत्फलसिद्धिलाभे।
देह्यभ्यनुज्ञां भगवन्प्रसीद त्वत्पादपद्मप्रणताय मह्यम्॥

इति द्वाराभिमुखं वृषभं सम्प्रार्थ्य किञ्चिद्द्वारशाखां समाश्रयन् देहलीमस्पृशन् दक्षिणपादपुरस्सरं

सद्योजातं प्रपद्यामीति मन्त्रमुक्त्वा ओं हां सद्योजातपादाभ्यां नम इति मन्त्रेण शनैः शनैः अन्तः प्रविश्य ओं हां अस्त्रराजाय नमः।

''दंष्ट्राकरालमत्युग्रं चास्त्रं वह्निसमप्रभम्।
शिवस्याभिमुखं शक्तिशूलभयवरान्वितम्।
जटामुकुटसंयुक्तमर्धेन्दुकृतशेखरम्।
चतुर्वक्त्रसमायुक्तं सर्वविघ्ननिवारकम्॥

इति ध्यात्वा देहलीमध्ये शिवद्वाराभिमुखतया स्थितमस्त्रराजं प्रीत्या परावृत्य तदभिमुखः पूजयेत्।

द्वारापालानामेतेषामासनमूर्तिमूलैरर्चनं चाष्टसंस्कारान् कुर्यात्। सर्वेभ्यो नम इति सम्पूज्य

द्वारपा देवदेवस्य द्वारं रक्षत यत्नतः।
निवार्य विघ्नसङ्घातमित्याज्ञा पारमेश्वरी॥

इति शिवाज्ञां श्रावयित्वा यवनिकामुत्सारयेत्।

II (a) Linga-śuddhi: The cleaning of the main deity (viz. linga)

अथाचार्यः मूललिङ्गसन्निधिमुपगम्य

ओं हां धर्मासनाय नमः।
ओं हां ज्ञानासनाय नमः।
ओं हां वैराग्यासनाय नमः
ओं हां ऐश्वर्यासनाय नमः।
ओं हां पद्मासनायः।

इति सम्पूज्य घण्टानादपूर्वकं लिङ्गशुद्धि कुर्यात्।

अभिषेकपात्रमस्त्रमन्त्रेण सङ्गृह्य मूलेन जलमापूर्य तन्मध्ये इमं मे गङ्गे इत्यादिना तीर्थानावाह्य धूपदीपौ समर्प्य पञ्चब्रह्मषडङ्गमन्त्रपूर्वकमस्त्रेण दिग्बन्धनामृतीकरणे कृत्वा मूलेनाभिषेकोदकेन संयोज्य

ओं नमो देवदेवेश सर्वलोकैकनायक।
उत्तिष्ठ स्नानकर्मार्थमात्मरक्षार्थमेव च।

यो रुद्रा अग्नाविति देवं सम्प्रार्थ्य प्रच्छन्नपटं धृत्वा लिङ्गे पूर्वेद्युः (रात्रौ) कृतां पूजां हृदयमन्त्रेण विभाव्य शिरसि (लिङ्गमस्तकोपरि) ईशानादि क्रमेण स्वाहान्तमूलेन शिवगायत्र्या वा सामान्यार्घ्यजलेनाऽर्घ्याणि दत्वा धूपदीपौ प्रदर्श्य अङ्गुष्ठादि कनिष्ठान्तमीशानादिपञ्चकं विन्यस्य कनिष्ठिकानामिकाभ्यां नवपुष्पं संगृह्य अङ्गुष्ठतर्जनीभ्यां लिङ्गमस्तकान्निर्माल्यं हृदयमन्त्रेणाऽवरोप्य गृहीतनवपुष्पं शिवगायत्र्या मूलेन च लिङ्गमूर्ध्नि समर्प्य निर्माल्यमौशान्यां दिशि पूर्ववद्हृदय मन्त्रेण चण्डार्थे संरक्षेत्।

प्रमुञ्च धन्वन इति-शिवास्त्रमन्त्रेण च लिङ्गे पाशुपतास्त्रमन्त्रेण पीठं च प्रक्षाल्य-ओं हां हृदयाय नमः स्वाहा। इति शुद्धमुद्रे प्रदर्श्य गर्भावरणं पूजयेत्।

(a) āvaraṇārcana: worship of the enclosure of the sanctum.

ततः शिवं प्रदक्षिणीकृत्य नैरृत्यादीशानान्तं गर्भानान्तं पूजयेत्।

नैरृते तं ब्रह्माणमिति मन्त्रेण-ओं हां वास्त्वधिपतये ब्रह्मणे नम इति वास्तुब्रह्माणं सम्पूज्य

वायव्यकोणे-ओं हां वरदगणपतयेनमः। निषुसीद गणपते इति सूक्तेनावाह्या दक्षिणाभिमुखं गणेशं सम्पूज्य

वक्रकुण्ड महाकाय कोटिसूर्यसमप्रभ।
शिवार्चने गणेशान निर्विघ्नं कुरु मे सदा।।

इति सम्प्रार्थ्य

उत्तरस्यां दिशि-ओं हां महालक्ष्म्यै नमः। हिरण्यवर्णामिति आवाह्य दक्षिणाभिमुखीं महालक्ष्मीं सम्पूज्य

महालक्ष्मि नमस्तुभ्यं धनधान्यप्रदायिनि।
मातः शिवार्चनद्रव्यसमृद्धिं कुरु मे सदा।।
इति सम्प्रार्थ्य

(मूललिङ्गस्य) प्रतीच्यां दिशि-प्रणो देवीति मन्त्रेण सरस्वतीमभ्यर्च्य

सरस्वति नमस्तुभ्यं शिवज्ञानप्रदायिनी।
पूजारम्भं करिष्यामि सिद्धिर्भवतु मे सदा।।
इति विज्ञाप्य

गोमुखे-देवीं वाचमिति मन्त्रेण वामा ज्येष्ठा रौद्रकाली कलविकरिणी बलविकरिणी बलप्रमथिनी सर्वभूतदमनी मनोन्मन्याख्या वामादि नवशक्तीः सम्पूज्य

ऐशान्यां दिशि- ओं हां गुरुभ्यो नमः। यो वेदादौ स्वर इति मन्त्रेण सदाशिव अनन्त श्रीकण्ठ अम्बिका स्कन्द विष्णु विधातृन् सप्तगुरूनावाह्य सम्पूज्य

''शिवादिगुरवो मह्यमनुज्ञां दातुमर्हथ।
शिवार्चनं करिष्येऽहं युष्मद्दर्शितमार्गतः।।

इति सम्प्रार्थ्य गुरुस्थाने श्रीगुरुपादकाभ्यां नमः- इति पादुके

वा पूजायित्वा सर्वान् प्रणम्य क्षितितलनिहितनिश्चलजानुः बद्धाञ्जलिः।

गणानाथाम्बिके स्वामिपादुके मां जगद्गुरो।
यजन्तमनुजानीत यथा सम्पन्नकारकम्॥
इति युगपत्संप्रार्थ्य शिवासनार्चनं कुर्यात्।

(d) Śivāsanārcanā: pīṭha-pūjā and nyāsa

अथाचार्यः शिवपूजार्थ माचम्य-प्राणानायम्य-देशकालौ सङ्कीर्त्य-एवंगुणविशेषणविशिष्टायामस्यां शुभतिथौ राजराष्ट्रभिवृध्यर्थं श्री परमेश्वरप्रीत्यर्थं यथासम्भवता नियमेन यथामिलितोपचारद्रव्यैः यथासम्भवद्भिरुपचारैश्च श्रीमनोन्मनीसहितसदाशिवस्य आवाहनाद्यर्चनं करिष्य इति सङ्कल्प्य देवस्य पीठाधोभागे-

चतुर्भुजां चतुर्वक्त्रां क्षीरार्णवतनुप्रभाम्।
समस्तभूतसंसेव्यां क्रियामाधाररूपिणीम्॥
ओं हां आधारशक्त्यै नमः
इत्याधारशक्तिं सम्पूज्य
ब्रह्मशिलायां पूर्वादिचतुर्दिक्षु-
ओं हां अनन्ताय नमः।
ओं हां वासुकये नमः।
ओं हां तक्षकाय नमः।
ओं हां कर्कोटकाय नमः
आग्नेयादि चतुष्कोणेषु-ओं हां पद्माय नमः।

ओं हां शङ्खपालाय नमः
ओं हां गुलिकाय नमः

मध्ये-ओं हां अनन्तासनाय नमः

इति सम्पूज्य तस्योपरि सिंहपीठं प्रकल्प्य-आग्नेयादि चतुष्कोणेषु

ओं हां धर्माय नमः।
ओं हां ज्ञानाय नमः।
ओं हां वैराग्याय नमः
ओं हां ऐश्वर्याय नमः।
पूर्वादि चतुर्दिक्षु-ओं हां अधर्माय नमः।
ओं हां अज्ञानाय नमः।
ओं हां अवैराग्याय नमः।
ओं हां अनैश्वर्याय नमः।
दक्षिणे-ओं हां रजसे नमः।
उत्तरे-ओं हां तमसे नमः।

मध्ये-ओं हां सत्वाय नमः।
ओं हां शिवसिंहासनाय नमः।

इति सम्पूज्य

तदूर्ध्वे-योगासनं प्रकल्प्य आग्नेयादि चतुरङ्घ्रिषु

ओं हां कृतयुगाय नमः।
ओं हां त्रेतायुगाय नमः।
ओं हां द्वापरयुगाय नमः।
ओं हां कलियुगाय नमः।

मध्ये-ओं हां महाविष्णवे नमः।
ऊर्ध्वमेखलाया नैर्ऋत्यां-ओं हां अधश्छदनाय नमः

तदूर्ध्वमैशान्यां-ओं हां ऊर्ध्वच्छदनाय नमः
ओं हां शिवयोगासनाय नमः

इति सम्पूज्य ऊर्ध्वपट्टिकोपरि विकसितपद्मासनं विभाव्य पट्टिकामूलाधारदेशे

पूर्वाद्यष्टदिक्षु-ओं हां कन्दाय नमः।
ओं हां बीजाय नमः।
ओं हां अङ्कुराय नमः।
ओं हां नालाय नमः।
ओं हां पत्रेभ्यो नमः।
ओं हां दलेभ्यो नमः।
ओं हां केसरेभ्यो नमः।
ओं हां कर्णिकायै नमः।

तदीयाष्टदलेषु-ओं हां अनन्ताय नमः।
ओं हां सूक्ष्माय नमः।
ओं हां शिवोत्तमाय नमः।

ओं हां एकनेत्राय नमः।
ओं हां एकरुद्राय नमः।
ओं हां त्रिमूर्तये नमः।
ओं हां श्रीकण्ठाय नमः।
ओं हां शिखण्डिने नमः।
पूर्वाद्यष्टदिक्षु- ओं हां इन्द्राय नमः।
ओं हां अग्नये नमः।
ओं हां यमायः नमः।
ओं हां निर्ऋतये नमः।
ओं हां वरुणाय नमः।

ओं हां वायवे नमः।
ओं हां कुबेराय नमः।
ओं हां ईशानाय नमः।
केसरेषु-ओं हीं वामाय नमः।
ओं हीं ज्येष्ठायै नमः।
ओं ही रौद्यै नमः।
ओं हीं काल्यै नमः।
ओं ही कलविकरिण्यै नमः।
ओं ही बलविकरिण्यै नमः।
ओं हीं सर्वभूतदमन्यै नमः।
कर्णिकामध्ये-ओं ह मनोन्मन्यै नमः।

स्फटिकवर्णां पाशाङ्कुशाभयवरधारिणीं शिवासनपद्म-कर्णिकायामीशानदिशि मध्ये स्थितां मनोन्मनीं पूजयामि-इति सम्पूज्य नमस्कारमुद्रां प्रदर्श्य ततः सर्वावयवयुक्तं पद्मं विभाव्य ओं हां शिवपद्मासनाय नमः- इति सम्पूज्य पट्टिकान्तर्गते केसराग्रमध्यमूलान्तं वृत्तत्रयं विचिन्त्य अग्रवृत्तस्य उत्तरपार्श्वे-

ओं हां विद्यातत्वाय नमः। विद्यातत्वाधिपतये नमः। अग्रवृत्तस्य मध्ये-

ओं हां शिवतत्वाय नमः। शिवतत्वाधिपतये रुद्राय नमः। कर्णिकामध्ये मण्डलत्रयं विचिन्त्य

प्रथम मण्डले दलाग्रवृत्ते-

ओं हां सूर्यमण्डलाय नमः। सूर्यमण्डलाधिपतये ब्रह्मणे नमः।

इति ब्रह्मभागे सम्पूज्य
द्वितीय मण्डले केसारग्रवृत्ते-

ओं हां सोममण्डलाय नमः। सोमण्डलाधिपतये विष्णवे नमः इति विष्णुभागे सम्पूज्य

तृतीय मण्डले कर्णिकाग्रवृत्ते-

ओं हां अग्निमण्डलाय नमः। अग्निमण्डलाधिपतये रुद्राय नमः इति रुद्रभागे सम्पूज्य

तत्रैव- ओं हां सत्वाय नमः।
ओं हां रजसे नमः।
ओं हां तमसे नमः।
तस्योपरि-ओं हां दक्षिणाग्नये नमः।
ओं हां गार्हपत्याग्नये नमः।
ओं हां आहवनीयाग्नये नमः।

तन्मण्डलान्तस्थित लिङ्गोपरि रुद्रभागोर्ध्वे आसनार्थं सदाशिवमण्डलं विभाव्य ओं हां सदाशिवमण्डलाय नमः। सदाशिवमण्डलाधिपतये। ओं हीं शक्तये नमः। ओं हां विमलासनाय नमः। इति विमलासनं सम्पूज्य ज्ञानशक्त्यासनं पूजयेत्।

विमलासनस्य पूर्वादिदिक्षुमध्ये च क्रमेण
ओं हां ऋग्वेदाय नमः।
ओं हां यजुर्वेदाय नमः।
ओं हां सामवेदाय नमः।
ओं हां अथर्ववेदाय नमः।
ओं हां ओङ्कारपीठाय नमः।
तदुपरि-ओं हां शक्तिमण्डलाय नमः।
शक्तिमण्डलाधिपतये महेश्वराय नमः।

तदुपरि सदाशिवभागे- ओं हां शिवासनाय नमः। ओं हां हं हां शिवमूर्तये नमः। इति शिवमूर्तिं तेजोरूपां दण्डाकाराविभक्तावयवां शिवतत्वात्कपरबिन्दुव्यापिकां विभाव्य

ओं हां ईशानमूर्ध्ने नमः।
ओं हें तत्पुरुषवक्त्राय नमः।
ओं हुं अघोरहृदयाय नमः।
ओं हिं वामदेवगुह्याय नमः।
ओं हं सद्योजातपादाय नमः।

इत्यङ्गुष्ठादि कनिष्ठान्तं पञ्चब्रह्मवीजैः समं-ईशानादि सद्योजातान्तं दण्डभङ्गी विन्यस्य

ओं हां ईशानमूर्ध्ने नमः-इत्यूर्ध्वमूर्ध्नि
ओं हां तत्पुरुषमूर्ध्ने नमः-इति पूर्वमूर्ध्नि
ओं हां अघोरमूर्ध्नि नमः- इति
दक्षिणमूर्ध्नि
ओं हां वामदेवमूर्ध्नि नमः- इत्युत्तरमूर्ध्नि
ओं हां सद्योजातमूर्ध्नि नमः-

इति मुण्डभङ्गिक्रमेण ईशानादिपञ्चब्रह्माणि सम्पूज्य

ओं हां ईशानवक्त्राय नमः- इत्यूर्ध्ववक्त्रे
ओं हां तत्पुरुषवक्त्राय नमः- इति दक्षिणवक्त्रे
ओं हां वामदेववक्त्राय नमः- इति उत्तरवक्त्रे
ओं हां सद्योजातवक्त्राय नमः- इति
पश्चिमवक्त्रे इति
वक्त्रभङ्गी विन्यस्य

ओं हौं शान्त्यतीतकलायै नमः इति शिरसि
ओं ह्यीं शान्तिकलायै नमः इति ललाटे
ओं हूं विद्याकलायै नमः इति कण्ठे
ओं ह्वीं प्रतिष्ठाकलायै नमः इति नाभौ
ओं ह्लीं निवृत्तिकलायै नमः- इति जान्वोः

एवं कलाभङ्गी च सम्पूज्याष्टत्रिंशत्कालान्यासं श्रीकण्ठकलामातृकान्यासं षडध्वगोलकादिन्यासांश्च विन्यस्याऽऽवाहनं कुर्यात्॥

III. The Arcana Proper:

(a) āvāhana (Invocation)

आवाहनार्थं योगासनमभ्यर्च्य

अप्रमेयनिर्देश्यमनुपममनामयम्।
सूक्ष्मं सर्वगतं नित्यं ध्रुवमव्यमीश्वरम्॥

वाच्यवाचकराहित्यं वाङ्मनोऽतीतगोचरम्।
भवन्तं भवतादिष्टों मन्त्रेणाऽभिनम्राम्यहम्॥
वयक्तं कुर्याद्विशेषेण निष्कलं सकलात्मनि।

इति विज्ञाप्य। ऋजूर्ध्वकायो मनश्चक्षुर्निरोधपूर्वकमिडया वायुमापूर्य कुम्भकं कृत्वा हृदि पुष्पसम्पूर्णमञ्जलिं निधाय दृढमावाहनमुद्रां बध्वा स्वशरीरे मूलाधारस्थितं मन्त्रमयं परशिवज्योतिस्समाकृष्य मूलधारप्रभृतिस्थितं हकारमतिलङ्ध्य हृदयपर्यन्तं नीत्वा हृत्कण्ठताल्वादिस्थितं हकारमतिलङ्घ्य हृदयपर्यन्तं नीत्वा हृत्कण्ठताल्वादिस्थित पृथिव्यादि पाशजाल ब्रह्मादि कारणेश्वर सहिताकारादि द्वादशान्त पर्यन्तमुच्चरयन्नेव पुष्पाञ्जलिमपि द्वादशान्तपर्यन्तं नीत्वा मन्त्रमयज्योतिः द्वादशान्तस्थित परमशिवेन संयोज्य अविश्रान्त परमामृतस्यन्दबिन्दुरूपं तत

आनीय भ्रूमध्यगत शिवमण्टपविश्रान्तं सम्भाव्य शरदिन्दु-सहस्त्रवद्विभाव्य हृद्देशेऽञ्जलिं धारयन्वायुं पिङ्गलया विरेच्य वायुना सह परमशिवज्योतिः पुष्पाञ्जलिमध्यप्राप्तं विभाव्य

परमाकाशसरित्समुद्भतकोटिसूर्यसमप्रभ कोटिशीतांशुशीतलाऽष्टत्रिं-शत्कलात्मक केसरोज्वल प्रणवकर्णिका-पञ्चक्षारबीजाढ्य परमानन्दमधुभरितमत्तभृङ्गनिषेवित चिन्छत्तिरूप सहस्त्रदलकमलमध्यगतं सद्यः समुद्यदनेक-कोटि शारदशशाङ्कसङ्काशप्रकाशं परमानन्दजलनिधिं निष्कलङ्कपरमशिवं सकलरूपान्वितं ध्यात्वा

ओं हां हौं शिवाय नमः। इति मूलेनानीय आवाहनमुद्रया नमो वा किरिकेभ्य इत्यावाह्य ईशानादि

ब्रह्मपञ्चकैः स्थापनमुद्रया लिङ्गे संस्थाप्य अस्मिन्महत्यर्णव इति मन्त्रेण सन्निधानमुद्रया स्वाभिमुखीकृत्य

"स्वागतम् ते महादेव।" इति विज्ञाप्य " वत्स सुखागत" मिति देवोनोक्तं मनसा विभावय स्वगतार्घ्यै दत्वा या ते रुद्रेति मन्त्रेण सन्निरोधनमुद्रया सन्निरुध्य ह्यद्यञ्जलिबन्धपूर्वकं

स्वमिन्सर्वजगन्नाथ यावत्पूजावसानकम्।
तावत्वं प्रीतिभावेन लिङ्गेऽस्मिन्सन्निधिं कुरु॥

इति सम्प्रार्थ्य शिवस्यानुमतिं भावयित्वा निरोधार्घ्यै दत्वा-ओं श्लीं पशुं हुं फडिति विघ्नानुत्सार्य अध्यवोचादिति मन्त्रेण कवचेनावकुण्ठ्य ओं हां हृदयाय नमः इत्यादि पञ्चाङ्गन्यास करन्यासपूर्वकं सकलीकृत्य देवस्य हृदयादिस्थानेषु विन्यस्य ओं हां हौं शिवाय नमः। इति पुष्पमारोप्य मूलेन परमीकृत्य ओं हः अस्त्राय नमः। इति संरक्ष्य अमृतमुद्रां प्रदर्श्य ओं हां शिवाय वौषडिति महामुद्रां प्रदर्श्य ध्यायेत्-

क्षित्यादिकुटिलप्रान्त मन्त्रसिंहासनस्थितम्।
शुद्धस्फटिकसङ्काशं द्वात्रिंशल्लक्षणान्वितम्॥
पद्मासनस्थं पञ्चास्यं प्रतिवक्त्रं त्रिलोचनम्।
दृक्क्रियेच्छाविशालाक्षं ज्ञानचन्द्रकलान्वितम्॥
धवलेशानवदनं पीतं तत्पुरुषाननम्।
कृष्णाघोरमुखोपेतं रक्ताभोत्तरवक्त्रकम्॥
सुश्वेतं पश्चिमास्यैकं सद्योजातं सुमूर्तिकम्।
नागोपवीतिनं शान्तं जटाखण्डेन्दुमण्डितम्॥
शक्त्यसीशूलखट्वाङ्ग वरव्यग्रकराम्बुजम्।
दक्षिणे त्वथ वामे च डमरुं वीजपूरकम्॥
नागसूत्रनीलाब्जं बिभ्राणं पञ्चभिः करैः।
भावयेत्परमीशानं जगत्कारणमव्ययम्॥
ध्यायेत्तद्वामभागे तु दिव्यरूपां मनोन्मनीम्।
जपाकुसुमसङ्कशां शुद्धवस्त्रविभूषिताम्॥
सर्वाभरणसम्पूर्णां पीनोरुजघनस्तनीम्।
सहस्त्रपद्मनीलाब्जवरदाभयधारिणीम्॥
एवं मनोन्मनीयुक्तं साक्षाद्देवं सदाशिवम्।
(लिङ्गेऽपि भावयन्नग्रे लिङ्गबुद्धिं परित्यजेत्॥)

इति मूर्तिं ध्यात्वा ओं हां हौं विद्यादेहाय नमः (इत्यावाह्य) ब्रह्मरन्ध्रान्त व्यापकं प्रासादमुच्चार्य शिवातत्वान्तव्यापकं सौदामिनीनिभं सृगञ्जलाविर्भूतं ध्यात्वा लिङ्गरोहे विद्यादेहं समुदितरूपं विन्यस्य

ओं हौं नेत्रेभ्यो नमः। इति नेत्रं सर्वज्ञताबीजमुखपञ्चकनेत्रेषु विन्यस्य पुष्पैरञ्जलिमापूर्य मूलमन्त्रं मेधादिकलोपेतं प्रचण्डर्ताण्डोपमं ब्रह्मादि कारणत्यागक्रमेण लयान्तमुच्चरन् सर्वकर्तारं निष्कालं विभुं ज्ञाननन्दमयं स्वरूपप्रकाशं सञ्चिन्त्य तन्मयीभूतसृष्टिक्रमेण

द्वादशान्तात्पतङ्गपिङ्गपिङ्गाभं ललाटेऽवतार्यं चन्द्रकोटिसदृशं तिर्यक्सुधापिण्डपाण्डुरितामिन्दुमण्डलं ध्यात्वा-

शिवगायत्रीमन्त्रेण पुष्पाञ्जलित्रयं दत्वा पञ्चवक्त्रेषु ईशानादि पञ्चमन्त्रैः धेनुपद्मलिङ्गास्त्र महामुद्राः प्रदर्श्य। मध्ये-षडङ्गेषु पञ्चमुखीमुद्राञ्जलिमुद्राश्च प्रदर्श्य पाद्यार्घ्याचमनीयानि दद्यात्॥

(b) Pāfua (offering water etc)

वामहस्तक्रमेण सत्रिपदीकं पाद्याचमनार्घ्यपात्रमुत्क्षिप्य पाद्यमीश्वरतत्वान्तं, आचमनं सदाशिवतत्वान्तं, अर्घ्य शिवतत्वान्तं च विभाव्य ओं हां हौ शिवाय नमः इति मन्त्रेण सद्योजातादिक्रमेण सपुष्पेणोत्तनेन दक्षिणकराङ्गुष्ठ-मध्यमानामिकाग्रेण श्रीपादयोः सत्यवामक्रमेण पाद्याम्:

ओं हां हौं शिवायनमः। इति मन्त्रेण मुखेषु तत्पुरुषादिक्रमेणाचमनम्।

ओं हां हौं शिवाय स्वाहा- इति पञ्चशिरस्सु ईसानादि क्रमेण विशेषार्घ्यं च दद्यात्। ओं हां हौं शिवाय वौषडिति सुगन्धपुष्पं ज्ञानमयं शिवसायुज्यहेतुं च ध्यात्वा हृन्मन्त्रेण समर्प्य दूर्वाक्षतांश्च दद्यात्।

महाघण्टां सन्ताड्य कद्रुद्रायेति मन्त्रपूर्वकं

ओं हां हौं शिवाय स्वाहेति धूपदीपौ दत्वा पूर्ववदाचमनार्घ्यें समर्प्य देवं स्नानार्थं प्रार्थयेत्।

(c) Abhiṣeka (ritual bath)

अथाभिषेकार्थं सिंहासनं सम्पूज्य-औं हां हौ शिवाय वौषडिति लिङ्गमस्तके पूष्पमेकं विन्यस्य देवं प्रार्थयेत्-

देवदेव जगन्नाथ पञ्चवक्त्रस्वरूपक।
मह्यं रक्षाभिषेकार्थमूर्ध्वास्योऽभिमुखो भव॥

इति सम्प्रार्थ्य

मूलेनाभिषेकपात्रमादाय-
पात्रपृष्ठाभागे- ओं हां सोममण्डलाय नमः।
पात्रमध्यभागे- ओं हां सूर्यमण्डलाय नमः।
पात्रस्य ओष्ठभागे-ओं हो अग्निमण्डलाय नमः।

इति सम्पूज्य मूलेनाभिमन्त्र्य चन्द्रसूर्यरहितकालं दृष्ट्वा (वामदक्षिणहस्ताभ्यां बध्वा) लिङ्गमस्तके चतुरङ्गुलायामेन गोश्रृङ्गप्रमाणेन वा-अभिषेकः कार्यः।

अभिषेकार्थर्भिनि प्राक्संस्कृत पञ्चगव्यादि व्यतिरित्तानि तैलादीन्यस्त्रेण सम्प्रोक्ष्य कवचेनाऽवकुण्ठ्य-अस्त्रेण संरक्ष्य हृदयबीजेनाऽभिषेचने विनियोजयेत्।

त्रियम्वकेति मन्त्रेण शुद्धतैलेनभ्यज्य (घृतसूक्तेन घृतेन वाभ्यज्य) शन्नो देवीरिति मन्त्रेण कवचमन्त्रेण च पिष्टामलक रीनचूर्णैरुद्वर्त्यद्व आपोहिष्ठेति तिसृभिःहिरण्यवर्णा इति चतसृभिश्च शुद्धोकेनाऽभिषिच्य, पवित्रन्त इति मन्त्रेण पञ्चब्रह्मषडङ्गैर्वा पञ्चगव्यं, पूर्वोक्तमन्त्रैः पञ्चामृतद्रव्यै- या फलिनीः- इति फलोदकेन, या जाता इति बीजोदकेन, हिरण्यरूप इति सुवर्णोदकेन, स हि रत्नानीति रत्नोदकेन, गन्धद्वारेति गन्धोदकेन, पुष्पावतीरिति पुष्पोदकेनऽभिषिच्य, प्रतिद्रव्यान्ते- शिवमूलमन्त्रेण गन्धपुष्पधूपदीपैरर्चयित्वा। ततो नाममन्त्रमुच्चरन् शुद्धनान्नेन नमः सोमय चेत्यनुवाकेन शनैः शनैः अभिषिच्य तदन्नं लिङ्गामभितस्थितं लिङ्गकृतिं कृत्वा गन्धपुष्पधूपदीपांश्च दत्वा ब्रह्ममन्त्रैरालभ्य धेनुमुद्रां प्रदर्श्य यो रुद्रो अग्नाविति

भुवनाध्वमन्त्रेण च कुशोदकं, कलाध्वमन्त्रेण च भसितादकेनाऽभिषय, हरिद्रोदकं-शक्तिमन्त्रेण पीठोपर्यभिषिच्य मूलेन शुद्धोदकेनाऽभिषय, शिवगायत्र्या सक्तुमिवेति ऋचा च शिवगन्धाष्टद्रव्ययुक्तेन गन्धोदकेन लिङ्गपिण्डिकेऽनुलिप्य हृदयेन पुष्पमभ्यर्च्य तत्तद्द्रव्यालाभे वस्त्रपून शुद्धतोयेन वाऽभिषिञ्चेत्।

मूलेन सहस्त्रधाराभिषेकं, ब्रह्मपञ्चकेन स्नपनोदकं, षडङ्गैः शुद्वोपंक, पञ्चस्नानमन्त्रैर्निरीक्षणादि संस्कारचतुष्टयेन संस्कृतेन गोश्रृङ्गेन, व्योमव्यापि मन्त्रमुच्चरन् वर्धनीतोयेन चाऽभिषिञ्चेत्॥

आचार्यस्तत्तत्तन्मन्त्रेण धाराकरकेन शंखेन वर्धन्या गोश्रृङ्गेन वा, अभिषेकं कुर्वन् ऋत्विग्द्वारा महान्यासपूर्वकं श्रीरुद्रचमकनृसूक्त रूद्रसूक्तपवमानसूक्त मन्युसूक्ताम्भसीत्यनुवाकाथर्वणशिखशिर्ष घोषान्ति दशशान्त्यादि मन्त्रपठनं कारयित्वा स्वयमपि पञ्चास्त्रमन्त्राद्युक्तमूलमन्त्रान् स्मरन् परया भक्त्या प्रत्यहमभिषिञचेत्॥

ततः सूक्ष्मधौतवस्त्रेणोद्वर्त्य मूलेन सुगन्धेनाऽनुल्पिय धूपदीपौ दत्वा युवं वस्त्राणीति सुलक्ष्णाभ्यां दुकूलाभ्यामलङ्कृत्य पद्मासनमभ्यर्च्य-

ओं हां शिवासनाय नमः
ओं हां हं हां शिवमूर्तये नमः
ओं हां हौं शिवाय नमः
ओं हों ईशानमूर्ध्ने नमः
ओं हें तत्पुरुषवक्त्राय नमः
ओं हूं अघोरहृदयाय नमः
ओं हीं वामदेवगुह्याय नमः

ओं हां सद्योजातपादाभ्यां इत्यासनमूर्तिमूलैः पञ्चब्रह्मभिश्चाष्ट-पुष्पैरभ्यर्च्य

ओं हां हृदयाय नमः
ओं हीं शिरसे नमः
ओं हूं शिखायै नमः
ओं हैं कवचाय नमः
ओं हौं नेत्रेभ्यो नमः
ओं हः अस्त्राय नमः इत्यभ्यर्च्य

अग्निदीपनार्थे मूलेनाभिमन्त्रविर्निवेद्य आचमनं दत्वा ततः कालयोग्य वस्त्रगन्धपूष्पमाल्योपवीतैस्सार्ध हेमपट्ट जटामुकमट गोलक कुण्डलक हारदामभिश्च लिङ्गे विधिवदलङ्करणं कृत्वा यज्ञोपवीतमितिमन्त्रेण यज्ञसूत्रं हिरण्यरूपमित्याभरणं गन्ध द्वारेति कुङ्कुमचन्द गन्धं अष्टगन्धगन्धं वा अनलिप्य- इरावतीत्यायनेते इति द्वाभ्यां-अक्षतान् पुष्पावतीरिति पुष्पं नमो हिरण्यबाहव इति रुद्राक्षमालिकां च समर्प्य।

ओं त्रयम्बाकाय नमः
ओं त्रिपुरान्तकाय नमः
ओं त्रिकालाग्निकालाय नमः
ओं कालाग्निरुद्राय नमः
ओं नीलकण्ठाय नमः।
ओं मृत्युञ्जयाय नमः
ओं सर्वेश्वराय नमः
ओं सदाशिवाय नमः

इत्यष्टनामभिस्तिलाक्षतैः सम्पूज्य- ओं निधनपतये नमः

इत्यादिमन्त्रै द्रोणपुष्पैरभ्यर्च्य

ओं हां हौ आत्मतत्वाधिपतये रुद्राय नमः
ओं हां हौ विद्यातत्वाधिपतये शिवाय नमः

ओं हां हौं शिवतत्वाधिपतये परमशिवाय नमः।

इति श्रीदलैष्च सम्पूज्य

ओं शर्वाय क्षितिमूर्तये नमः

ओं भवाय जलमूर्तये नमः

ओं रुद्राय तेजोमूर्तये नमः

ओं उग्राय वायुमूर्तये नमः

ओं भीमायाकाशमूर्तये नमः

ओं पशुपतये यजमानमूर्तये नमः

ओं ईशानाय सूर्यमूर्तये नमः

ओं महादेवाय सोममूर्तये नमः

शिवाय नम इत्यादि नामाष्टेन वाऽर्चयित्वा ओं प्रभवे नमः

ओं शब्भवे नमः

ओं उमापतये नमः

ओं नमो भगवते रुद्राय नमः

ओं ई ऊ व्योमव्यापिने वौषडिति, ओं नमो नीलकण्ठाय इति च अभ्यर्च्य पञ्चब्रह्मनामभिः हृदयाद्यंगनामभिः भवाद्यष्टनामभिः अष्टोत्तरशतनामभिः रुद्रत्रिशत्यागमसा-रात्रिशित्यादिनामभिः सहस्रनामाभिश्चाऽभ्यर्च्य पीठे मनोन्मनीञ्चाभ्यर्च्य (मन्त्रहविर्निवेद्य) अस्त्रमन्त्रेण घण्टां सन्ताडय धूपदीपौ दत्वा ततश्चामनार्घ्ये दत्वा मनोरथमुद्रां प्रदश्र्य भगवन्नज्ञां देहि भोगाङ्गानि पूजयामीति विज्ञाप्य मूलमन्त्रेणऽर्च्य, आवरणभ्यपूजां कुर्यात्॥

शिवासन पद्मस्य कर्णिकायां शिवमभ्यर्च्य तस्य दलमूलेषु

ओं हों ईशानमूर्ध्ने नमः-
उमासहितं ईशानं पूजयामि

ओं हें तत्पुरुषवक्त्राय नमः- गैरीसहितं तत्पुरुषं पूजयामि।

ओं हूं अघोरहृदयाय नमः गङ्गसतिं अघोरं पूजयामि। ओं हीं वामदेव गुह्याय नमः- गणाम्बिकासहितं वामदेवं पूजयामि। ओं हों सद्योजातपादाभ्यां नमः अम्बिकासहितं सद्योजातं पूजयामि।

महेश्वरभागे ओं हां विद्यादेहाय नमः।
आग्नेयादि विदिक्षु, मध्ये, ईशान्ये च क्रमेण
ओं हां हृदयाय नमः- वामिनीसहितं हृदयं पूजयामि।
ओं हीं शिरसे नमः-नीलिनीसहितं शिरः पूजयामि।
ओं हूं शिखायै नमः- चक्रिणीसहितं शिखां पूजयामि।
ओं हैं कवचाय नमः- शंखिनी सहितं कवचं पूजयामि।
ओं हौं नेत्रत्रयाय- नमः खड्गिनीसहितं नेत्रत्रयं पूजयामि॥
पुनरैशान्ये-
ओं हः अस्त्राय नमः भंगिनीसहतं अस्त्रं पूजयामि।
विद्यादेहे वाग्मिन्यै नमः।
ओं नं नमः प्रथमावरणपूजां समर्पयामि।

अथ द्वितीयावणपूजां करिष्ये-

पूर्वादि दलमध्येषु ओं अनन्ताया भूमिसहिताय नमः

ओं सूक्ष्माय स्वाहासहिताय नमः

ओं शिवोत्तमाय स्वधासहिताय नमः

ओं एकनेत्राय क्षान्ति (शिक्षा) सहिताय नमः

ओं एकरुद्राय पुष्टिसहिताय नमः

ओं त्रिमूर्तये श्रीसहितायनमः

ओं श्रीकण्ठाय कीर्तिसहिताय नमः

ओं शिखण्डिने मेधासहिताय नमः

ओं मं नमः द्वितीयावरणपूजां समर्पयामि।

तृतीयावरणपूजां करिष्ये-

दलमध्याग्नयोर्मध्येषु-

इन्द्रेशानयोर्मध्ये- ओं हां कुण्डलिनीसहिताय नन्दिने नमः

इन्द्राग्नयोर्मध्ये- ओं हां पद्मिनीसहिताय महाकालाय नमः

यमाग्न्योर्मध्ये ओं हां ह्लादिनीसहिताय भृङ्ग्गणे नमः

यमनिर्ऋत्योर्मध्ये- ओं हां भृङ्ग्गणीसहिताय गणपतये नमः

निर्ऋतिवरुणयोर्मध्ये- ओं हां भद्रासहिताय वृषभाय नमः

वायुवरुणयोर्मध्ये- ओं हां अम्बिकायै नमः

ईशानसोमयोर्मध्ये- ओं हां रूपिणीसहिताय

चण्डेश्वराय नमः।
ओं शिं नमः तृतीयावरणपूजां समर्पयामि।

अथ चतुर्थावरणपूजां करिष्ये-

दलाग्रेषु पूर्वादि दिक्षु-

ओं हां लं शचीसहिताय इन्द्राय नमः
ओं हां रं स्वाहासहिताय अग्नये नमः
ओं हां मं कालकण्ठीसहिताय यमाय नमः
ओं हां षं डाकिनीसहिताय निर्ऋतये नमः
ओं हां वं भोगिनीसहितय वरुणाय नमः
ओं हां यं घोरसहिताय वायवे नमः
ओं हां संगम्भीरिणीसहिताय कुबेराय नमः
ओं हां हं हर्षिणीसहिताय ईशानाय नमः

इन्द्रेशानयोर्मध्ये-ओं हां आं सावित्रीसहिताय ब्रह्मणे नमः
निरूऋतिवरुणयोर्मध्ये-ओं हां श्री लक्ष्मीसहिताय विष्णवे नमः

ओं वां नमः चतुर्थावरणपूजां समर्पयामि।
अथ पञ्चमावरणपूजां करिष्ये-
आधारशिलाया पूर्वादिदिक्षु-
ओं प्राणशक्तिसहिताय वज्राय नमः
ओं शक्तये नमः
ओं कोपात्मशक्तिसहिताय दण्डाय नमः
ओं गुणात्मशक्तिसहिताय खड्गाय नमः
ओं कोमलात्मशक्तिसंहिताय पाशाय नमः
ओं विषात्मशक्तिसहिताय अङ्कुशाय नमः

ओं गदायै नमः
ओं विकृतात्मसहिताय त्रिशूलाय नमः
मध्ये-ओं माहात्म्यशक्तिसहिताय पद्माय नमः
ओं मङ्गलात्मशक्तिसहिताय चक्राय नमः
ओं यं नमः पञ्चामावरणपूजां समर्पयामि।
ब्रह्मभागे अधः पट्टिकामावृत्य पूर्वादीशानान्तं
ओं हां प्रकृतितत्वाय नमः
ओं हां बुद्धितत्वाय नमः
ओं हां अहङ्कारतत्वाय नमः
ओं हां चित्ततत्वाय नमः
ओं हां श्रोत्रतत्वाय नमः
ओं हां त्वक्तत्वाय नमः
ओं हां चक्षुस्तत्वाय नमः
ओं हां जिह्वातत्वाय नमः
ओं हां प्राणतत्वाय नमः
ओं हां पादतत्वाय नमः
ओं हां पाणितत्वाय नमः
ओं हां पायुतत्वाय नमः
ओं हां उपस्थतत्वाय नमः
ओं हां शब्दतत्वाय नमः
ओं हां स्पर्शतत्वाय नमः
ओं हां रूपतत्वाय नमः
ओं हां रसतत्वाय नमः
ओं हां गन्धतत्त्वा नमः
ओं हां आकाशतत्वाय नमः
ओं हां वायुतत्वाय नमः

ओं हां अग्नितत्वाय नमः
ओं हां जलतत्वाय नमः
ओं हां पृथिवीतत्वाय नमः

ब्रह्मजज्ञानमिति मन्त्रं पठन् ध्यायेत्
ब्रह्माणञ्च चतुर्वक्त्रं चतुर्बाहुं जटोर्ध्वकम्।
दण्डकुण्डीसमायुक्तं वराभयकरं शुभम्।।
हंसारूढाय
विद्महे कूर्चहस्ताय धीमहि। तन्नो ब्रह्मा
प्रचोदयात्।। ओं
हां आत्मतत्वाधिपतये सृष्टिरूपाय सरस्वती
समेताय
ओं हां ब्रह्मणे नमः- इत्यर्भच्य,

ततः कण्ठदेशादूर्ध्वपट्टिकायाः अधः पर्यन्तं विष्णुभागे पूर्ववदावृत्य

ओं हां मायातत्वाय नमः
ओं हां कालतत्वाय नमः
ओं हां नियतितत्वाय नमः
ओं हां कलातत्वाय नमः
ओं हां विद्यातत्वाय नमः
ओं हां रागतत्वाय नमः
ओं हां पुरुषतत्वाय नमः- इत्यभ्यर्च्यद्व इदं
विष्णुरिति मन्त्रं
पठन् ध्यायेत्।

नीलाञ्जनाभं सुमुखरविन्दं
पीताम्बराभीतिकरोरुहस्तम्।

सशङ्खचक्रं सकिरीटमौलिं नमामि शान्तं
परवासुदेवम्॥

''नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्'' ओं हिं विद्यातत्वाय नमः। विद्यातत्वाधिपतये स्थितिरूपाय लक्ष्मीसमेताय ओं हिं विष्णवे नमः इत्यभ्यर्च्य,

ऊर्ध्वं पट्टिकादिरुद्रभागे-पूर्वादिपूर्वपर्यन्तमावृत्य

ओं हां शिवातत्वाय नमः
ओं हां शक्तितत्वाय नमः
ओं हां सादाख्यतत्वाय नमः
ओं हां ईश्वरतत्वाय नमः
ओं हां शुद्धविद्यातत्वाय नमः इत्यभ्यर्च्यद्व यो
रुद्रो
अग्नाविति मन्त्रं पठन् ध्यायेत्

नवनयनगुणास्यं नागयज्ञोपवीतं
रसकरपदपद्मं कालकण्ठाग्निकेशम्।
अभयवरदशूलं वह्निमूले च वामे
मृगमपि सितरूपं रुद्रदेवं नमामि॥''

''तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥''

ओं हां हूं शिवातत्वाय नमः। शिवतत्वधिपतये संहाररूपाय रौद्रीसमेताय ओं हूं रुद्रेश्वराय नमः। इति सम्पूज्य ऊर्ध्वे महेश्वरभागे

ओं हां अहङ्कारतत्वाय नमः
ओं हां मनस्तत्वाय नमः
ओं हां बुद्धितत्वाय नमः

ओं स्पर्शतत्वाय नमः
ओं हां शब्दतत्वाय नमः

इति पुर्यष्टकमभ्यर्च्य, "यो वेदादाविति" मन्त्रेणाभिमन्त्र्य ध्यायेत्।

चतुरास्यं चाष्टहस्तं दधतं द्वादशाक्षकम्।
कङ्कालं डिण्डिमं पाशमंङ्कुशं घण्टदीपकौ।
वराभयकरं प्रोक्तं यज्ञसूत्रमलङ्कतम्।

"रक्ताभं विद्महे वाग्विशुद्धाय धीमहि तन्नश्शिवः प्रचोदयात्" तिरोभावरूपाय महोश्वरीसमेताय ओं ही महेश्वराय नमः- इत्यभ्यर्च्य,

ततः सदाशिवभागे- ओंहांस्थूलतत्वाय नमः
ओं हांसूक्ष्मत्वाय नमः
ओं हां कारणतत्वाय नमः

ईशानस्सर्वविद्यानामिति मन्त्रेणाभिमन्त्र्य ध्यायेत्।
शरच्चन्द्रनिभाकारं पञ्चवक्त्रसमन्वितम्।
दशबाहुसमायुक्तमेकहृद्ग लकं शुभम्॥

द्विपादं चित्रवस्त्राद्यं सर्वाभारणभूषितम्।
जटामुकुटसंयुक्तं टङ्कशूलसमन्वितम्॥

असिवज्रसमायुक्तमभयं दक्षिणे घृतम्।
सपाशं वरदं घण्टां दहनं चाङ्कुशं तथा।
वामहस्ते धृतं देवं तन्मध्ये ज्योतिरूपकम्॥

इति ध्यातवा "निरञ्जनाय विद्महे निराभासाय धीमहि। तन्नोऽतनूसूक्ष्मः प्रचोदयात्"॥ अनुग्रहरूपाय श्रीमनोन्मनीसमेताय सदाशिवाय नमः- इत्यभ्यर्चयेत्।

(c) Puṣpa-samarpaṇa (offering of flowers)

मुकुटे-बृहतीपुष्पं। मूर्ध्नि-अर्कपुष्पष्पं। श्रुत्योः- पुन्नागपुष्पं। हृदये-नन्द्यावर्तपुष्पं। नाभौ-पाटलीपुष्पां। गुह्ये-करवीरपुष्पं। जान्वोः चम्पकपुष्पं। पादयोः- नीलोत्पलपुष्पं समर्पयामीति शिवमष्ट-पुष्पिकयाऽभ्यर्च्याऽऽचमनार्घ्ये समर्प्य, धेनमुद्रां महामुद्रां च प्रदर्श्य, गन्धपुष्पैः घण्टामस्त्रमन्त्रेणाऽभ्यर्च्य, सावरणाय देवाय धूपदीपौ प्रदर्शयेत्॥

V. In the next sequence the three Śaktis (Viz. Yoga-śakti, Bhoga-śakti, and Vīra-śakti) are worshipped. Yogaśakti is variously described as stationed on the left side of the linga, as the very pedestal, or as the natural energy inhering in the linga (sahaja). Bhoga-śakti is described as located in closed proximity to the linga in the sanctum, as stationed on the left side of the deity, or as the metallic icon kept close to the linga. While these two Śaktis are in the sanctum, Vīra-śakti is independently located, in a separate shrine outside the sanctum and is four-armed. Worship is to be offered in the respective places.

(1) योगं भोगं तथा वीरं शक्तिरेषा त्रिधा भवेत्।
योगशक्तिस्तु पीठं स्याद् भोगशक्तिः समीपगा
वीरं बाह्यालये शक्तिः तत्तत् स्थानेषु पूजयेत्॥

(2) योगशक्तिर्गर्भगेहे मूललिंगस्य वामके।
महेश्वरस्य वामे तु भोगशक्तिरुदहृता॥

पृथग्गोहस्थिता देवी चतुर्भुजसमन्विता।
वीरशक्तिरिति प्रोक्ता शिवतत्त्वार्थवेदिभिः॥

ततः परशिवस्य वायभागे स्थितां योगशक्तिं ओं ह्रीं योगशक्तयासनाय नमः। ओं ह्रीं योगशक्तिमूर्तये नमः। ओं हीं योगशक्त्यै नमः। इत्यासनमूर्तिमूलैरभ्यर्च्य ध्यायेत्।

पूर्णचन्द्राभावदनां नीलकुन्तलमूर्धजाम्।
प्रफुल्लोत्पलवक्त्राभविस्तीर्णायात लोचनाम्।

नोलेत्पलदलप्रख्यां चन्द्रार्धकृतशेखराम्।
अतिवृत्तघनोत्तुङ्ग स्निग्धपीनपयोधराम्॥

तनुमध्यां पृथुश्रोणीं पीतसूक्ष्मतराम्बराम्।
सर्वाभरणसम्पन्नां माणिक्यतिलकोज्वलाम्॥

विचित्रपुष्पसङ्कीर्णकेशपाशमनोहराम्।
सर्वतोनुगुणाकारां किञ्चिल्लज्जाननताननाम्॥

हेमारविन्दं विकसद्दधानां दक्षिणेकरे।
दण्डवच्चापरं हस्तं न्यास्याऽऽसीनां सहासने॥

भुक्तिमुक्तिप्रदां देवीं सच्चिदानन्दरूपिणीम्।
सदाशिवेश्वरहर श्रीशद्रुहिणमातरम्।

समस्तगौरीलक्ष्म्यादि शक्तिचक्रस्य नायिकाम्।
भक्त्योपचारमार्गेण क्रमेण परिपूज्येत्॥

अथवा–

"ओं गणम्बिकायै विद्महे कर्मासिध्यै च धीमहि। तन्नो गौरी प्रचोदयात्।" "गोरीमिमास" इति मन्त्रेण विधिवदभ्यर्च्य योनिमुद्रां प्रदर्शयेत॥

सुवर्णरजतताम्रतूटान्यतमनिर्मितं सलक्षणं धूपपात्रं निर्मगोनाङ्गरवह्निनाऽऽपूर्य तस्मिन् धूपद्रव्यं निक्षिप्य निरीक्षणादिभिः संस्कृत्य गन्धपुष्पैरभ्यर्च्य धूपमुद्रा प्रदर्श्य

धूपपात्रं दक्षिणहस्तेनादाय वामहस्ते घण्टां घोषयन्नेव देवस्य घ्राणदेशे ओं हां हौ शिवाय धूपं स्वाहा इति प्रदर्श्य तदनन्तरं धूपपात्रस्थं धूरसि धूर्वेति मन्त्रेण किरीटे बिन्दुद्वयान्वित-पार्श्वदण्डकारं मुखवृत्ते नादं बिन्दुं देहे हंकार बाह्वोरैकारं पादयोरूकारं च धूपपात्रभ्रमणेमॉन भावयेत्॥

ततः उक्तलक्षणपात्रनिहितवर्त्यरोपितं दीपं निरीक्षणादिभिः संस्कृत्य पुष्पैरभ्यर्च्य दीपमुद्रां प्रदर्श्य दीपमुद्धृत्य घण्टा घोषयन्नेव ओं हां हौं शिवाय दीपं स्वाहा इति नेत्रेषु प्रदर्श्य उद्दीप्यस्वेति मन्त्रेण धूपपात्रवत्किरीटादी पादान्तं तद्वर्णविन्यासभावनया दीपपात्रं भ्रामयेत्॥ अनन्तरं शिवायाचमानीयमर्घ्यञ्च दत्वा निवेदनाद्युपचारान् कुर्यात्।

ततः गुरुः निवेदनार्थं विमलासनमभ्यर्च्य शुद्धवस्त्रभस्म-रुद्राक्षभूषितैः परिचारकैः विधिवत्कृतेन

शुद्धान्नपायसान्न कृसारान्न गुडान्न मुद्ग ान्न दध्यन्न मध्वन्नचयेन पूरिताः सौवर्ण राजत ताम्रकांस्यान्यतमनिर्मिताः स्थालिकाः शङ्खस्वन समायुक्तैः छत्रचामरान्वितजनैः सह ऋत्विजा कृत जलसेचने मार्गे प्रासादप्रदक्षिणपुरस्सरं समानीय देवस्य पुरतः (मुखमण्डपभूतले) मण्डलोपरि स्थापयित्वा परिवारदेवतादीनां नैवेद्यस्थालिकाः ओं हां हृदयाय नमः। इत्यर्घ्यजलेन प्रोक्ष्य तालत्रयदिग्बन्धनावकुण्ठधेनुमुद्राः विरचय्य अन्नमुद्रमहामुद्रां पर्वतमुद्रां च प्रदर्श्य गणेशमन्निधिमुपगम्य महाघण्टा पञ्चमहावाद्यैः सह पूर्वं गणपतये विधिवन्निवेद्य तत्पुष्पं विसृज्य पूर्वविन्यस्तपात्रमुद्धृत्य गायत्र्या प्रोक्ष्य परिषेचनमन्त्राऽस्त्रमन्त्राभ्यां परिषिच्य, ओं हां हौं शिवाय स्वाहा, अमृतोपस्तरणससीति आपोशनं दत्त्वा प्राणादि मरुन्मन्त्रैः सपुष्पया मृगीमुद्रया निवेद्य तत्काले अन्नसूक्तं जपित्वा हविर्हस्तात्समादाय निक्षिप्य

गौरीहस्तेनाऽन्नं शिवाहस्ते संयोज्य ततः शिवाय सुगन्धपानीयं प्रदाय, ओं हां हौ शिवय नमः। इति पुष्पं समर्प्य द्रव्यजातं सम्पूर्णं विभाव्य सूक्ताकान्ते अमृतापिधानमसीति उत्तरापोशनं दत्वा, करास्य पादप्रक्षालनार्थ-अस्त्रमन्त्रो शुद्धोदकेन त्रिवारं सम्प्रोक्ष्य करेद्वर्तनार्थं कर्पूरादिसहितं चन्दनं दत्वा, ओं हां हौ शिवाय स्वधेत्याचमनं दत्वा, पृथग्गेहस्थितायै देव्यै ततश्चण्डेश्वराय सोमस्कन्दाय उमामहेश्वराय चन्द्रशेखरादि मूर्तिभ्यश्च निवेदयेत्॥

ततः परमेश्वरस्य आचामनाऽर्घ्यपाद्यानि त्र्यैकपञ्चसंख्याभिः क्रमेण हस्तोर्ध्वमुखपादद्वयेषु दत्वा, आस्योद्वर्तनार्थं मुखवासं समर्प्य पूगीफल शिलाचूर्ण (शङ्खचूर्ण)कर्पूरादि मिश्रितं खण्डितमूलाग्रनवनागवल्लीदलैर्युतं ताम्बूलं गायत्र्या प्राक्ष्य, आदौ गणेशाय पश्चाच्छिवाय, ततः परिवारेभ्यो तत्तन्मन्त्रेण दत्वा यजनसाद्गुण्यार्थं हिरण्यरूपस्स हिरण्यमिति मन्त्रेण

"हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥"

इति प्रार्थ्य दक्षिणां समर्पयेत्॥

अथाऽऽचार्यो नीराजनाद्युपचारार्थमनंतासनमभ्यर्च्य ऋत्विग्भिस्सहं शुकनासिस्थालं गत्वा यथाविभवं एकद्वित्रिपञ्च सप्ताष्टनवदशनागचक्रवृषगजरथ मेरूपुरुषमृगभ्यसद्योजातादि ब्रह्मपञ्चकाद्यारत्रिकान्

निरीक्षणादि चतुः संस्कारैः संस्कृत्य

आरात्रिकैशन्ये ओं हां शान्त्यतीतकलायै नमः
पूवे- ओं ह्रीं शान्तिकलायै नमः
दक्षिणे- ओं हूँ विद्याकलायै नमः

उत्तरे- ओं हैं प्रतिष्ठाकलायै नमः
पश्चिमे- ओं हौं निवृत्तिकलायै नमः।

इत्यभ्यर्च्य कुम्भे- ओं हां आत्मत्वाय नमः। आत्मतत्वाधि पतये ब्रह्मणे नमः॥

ओं हां विद्यातत्वाय नमः। विद्यातत्वाधिपतये विष्णवे नमः
ओं हां शिवतत्वाय नमः। शिवतत्वाधिपतये रुद्राय नमः

दलेषु- ओं ह्रीं नवशिक्तिभ्यो नमः
नाले- ओं ह्रीं भवान्यै नमः
ज्वालायां- ओं हां वह्निचैतन्याय महेश्वराय नमः।
इत्यभ्यर्च्य

पञ्चब्रह्मभिः सम्पूज्य पूर्वोक्तारार्तिकाधिपान् चतुर्थ्यन्त नाम्ना समभ्यर्च्य गन्धपुष्पैरलङ्कृत्य आवाहनाद्यवकुण्ठनान्तमुद्राः प्रदर्श्य धूपदीपौ दत्वा पाणिभ्यामुद्धत्य देवस्य शीर्षादि पादपर्यन्तं मुखादिजानुपर्यन्तं, कण्ठादिकटिपर्यनतं, प्रासादमन्त्रैः सद्योजातादि ब्रह्मपञ्चकैः सङ्ग्रहणेष्टया-हिरण्यपात्रं-सोमो वै-ऋत्त्वा सत्येन ऐन्द्राग्नमुपसाधितं इत्यादिभिः स्वस्तिसूक्तैश्च भेरीमृदङ्ग शङ्ककाहलपटहवीणावेणुमहाघण्टास्वनपूर्वकं त्रिर्भ्रामयेत्।

तदनन्तरं आर्घ्यं दत्वा अभिवस्त्रासुवसना- युवं वस्त्राणीति वा रक्षां दत्वा भवाद्यष्टनामभिरष्टपुष्पैरभ्यर्च्यमानस्तोक इति बृहत्सामेति वा भस्मरक्षां समर्प्यद्ब ऋतेन मित्रावरुणेति मुखवस्त्रं, मूर्धानं दिव इति मुकुरं, दूरमस्मच्छत्रवों यन्त्विति छत्रं, राजाधि राजायेति चामरं, आवातवाहि भेषजमिति व्यजनं, शन्नोदेवीरिति

बर्हिञ्छं, योऽपां पुष्पं त्वमग्ने रुद्र इति द्वाभ्यां मन्त्रपुष्पं समर्प्य, ऋग्यजुस्सामाथर्वोपनिषद्वाक्य शास्त्र पुराणागमज्योतिषशिवस्तोत्र पञ्चाङ्गश्रवणराजाशीर्वचन नानादेश-प्रसूतनर्तनपद्मदीपाद्यु-पचारादीन् सर्वान् सम्यक् परिकल्प्य, उत्तरनीराजनं सन्दर्श्य दूर्वाबिल्वकुशाक्षतपुष्पाञ्जलिं ओं हा हौं शिवाय नमः। इति समर्पयेत्।

Worship of Bhoga-śakti installed in the sanctum of the left side of the main deity ('maheśvarasya vāme tu bhoga-śaktir udāhṛtā')

गर्भस्थिते (देवस्य वामभागे) भोगशक्ति बिम्बे
ओं ह्री भोगशक्त्यासनाय नमः
ओं ह्री भोगशक्तिमूर्तये नमः
ओं ह्रीं भोगशक्त्यै नमः।

इति सम्पूज्य स्थापनादि पञ्चमुद्राः प्रदर्श्य गोरीकलान्यासं विधाय, ओं ह्रीं भोगशक्त्यै नमः। इत्यभिषेकार्थं-अर्घ्योदकेन सम्प्रोक्ष्य (अभिषिच्य) वस्त्रकञ्चुकगन्धमाल्यादिभिरलङ्कत्य हेमाभारणदामादिभिसम्पूज्य पद्मासन-मभ्यर्च्य हृदुपरि

''कात्यायिन्यै च विद्महे कन्याकुमार्ये च धीमहि।
तन्नो गौरीः प्रयोदयात्''॥

इत्यभिमन्त्र्य ध्यायेत्-

''श्यामाभां चित्रवस्त्रां सरसिजवदनां
शातकुम्भाङ्गभूषां
केशे बद्धां त्रिभंङ्गी स्तनभरनमितां दीर्घपादां
सुवस्त्राम्।
योगाङ्गी भोगशक्तिं कुमुदकरतलां
वामहस्तस्थिताब्जां

देवीं नित्यं प्रसन्नं विधिहरिविनुतां देवदेवीं नमामि॥''

''श्यामां त्रिणेत्रां'' इति वा यथामूर्तिरूपं ध्यात्वा, आवरणपूजां कुर्यात्॥

(1) प्रथमावरणे- ओं ह्रीं ईशानमूर्ध्ने नमः।

ओं ह्रीं तत्परूषवक्त्राय नमः।
ओं ह्रीं अघोरहृदयाय नमः।
ओं ह्रीं वामदेवगुह्याय नमः।
ओं ह्रीं सद्योजातपादाभ्यां नमः।
ओं ह्रीं हृदयाय नमः।
ओं ह्रीं शिरसे नमः।
ओं ह्रीं शिखायै नमः।
ओं ह्रीं कवचायै नमः।
ओं ह्रीं नेत्रत्रयाय नमः।
ओं ह्रीं अस्त्राय नमः।

प्रथमावणपूजां समर्पयामि।

(2) अथ द्वितीयावरण पूजां करिष्ये-पूर्वाद्यष्टदिक्षु-

ओं ह्रीं वामायै नमः।
ओं ह्रीं ज्येष्ठायै नमः।
ओं हां रौद्यै नमः।
ओं हीं काल्यै नमः।
ओं हां कलविकरिण्यै नमः।
ओं हां बलविकरिण्यै नमः।
ओं हां बलप्रमथिन्यै नमः।

ओं हां सर्वभूतदमन्यै नमः।

मध्ये- ओं ह्रां महेश्वर्यै नमः।

द्वितीयावरणपूजां समर्पयामि।

(3) अथ तृतीयावरण पूजां करिष्ये-
आसनावृतौ पुर्वाद्यष्टदिक्षु- ओं ह्रां शच्यै नमः।

ओं हां स्वाहायै नमः।
ओं हां कालकण्ठ्यै नमः।
ओं हां दाहिन्यै नमः।
ओं हां भोगिन्यै नमः।
ओं हां घोरायै नमः।
ओं हां गम्भीरिण्यै नमः।
ओं हां हर्षिण्यै नमः।

ईशान दक्षिणतः- ओं हां सरस्वत्यै नमः।
निर्ऋति वामतः ओं हां महालक्ष्म्यै नमः।

तृतीयावरणमभ्यर्च्य धूपदीपनैवेद्यादिकं दद्यात्॥

(c) Worship of Vīra-śakti, who is visualized as four-armed and stationed in a separate shrine.

पृथग्गेहस्थिता देवी चतुर्भुजसमन्विता।
वीरशक्तिरिति प्रोक्ता शिवतत्त्वार्थवेदिभिः॥

अथ देशिकः देवालयं गत्वा विघ्नेश्वरपूजां कृत्वा पूजाद्रव्याण्युपाहृत्य सामान्यार्घ्यं परिकल्प्य अस्त्रमन्त्रेण प्रोक्ष्य आचम्य प्राणनायम्य करन्यासं कुर्यात्-

करौ गन्धादिलेपितौ कृत्वा वामकरतलं तत्पृष्ठश्च मणिबन्ध त्समारभ्य दक्षिणपाणिना ओं हः अस्त्राय फडिति द्विवारं

परिमृज्य तेनैव मन्त्रेण दक्षिणकरतलं तत्पृष्ठं च मणिबन्ध त्समारभ्य वामपाणिना त्रिवारं परिमृज्य करावामणिवन्ध मस्त्रतेजसा व्याप्तौ सञ्चिन्त्य सम्पुटीकृत्य अङ्गुष्ठद्वयमध्ये-ओं हीं शक्त्यै वौषडिति ध्यात्वा योजिताङ्गुष्ठद्वयकर्णिका-कारकरसम्पूटकमले

ओं ह्रीं गौर्यासनाय नमः
ओं ह्रीं गौरीमूर्तये नमः
ओं ह्रीं गौर्यै नमः

इति तेजोमयीं स्थिरविद्युन्निभां शक्तिमूर्तिं विन्यस्य शक्तिकरौ भावयित्वा ओं ह्रीं ग्लौं गौरीनेत्रेभ्यो नमः इति हस्ततलयोर्मध्यमाङ्गलिभ्यां कनिष्ठाद्यङ्गुलीषु-

ओं ह्रां हृदयाय नमः
ओं ह्रीं शिरसे नमः।
ओं ह्रुं शिखयै नम।
ओं ह्रैं कवचाय नमः।
ओं ह्रः अस्त्राय नमः।

इति विन्यस्य वामदक्षिणकरौ तदितरकराभ्यां ओं हौं कवचाय नमः इत्यवकुण्ठ्य करद्वयं संयोज्य ओं हीं गौर्यै वौषडिति परमीकृत्य, अङ्गन्यासं कृत्वा (कवचेनावकुण्ठ्य) महामुद्रां प्रदर्श्य ततः भूतशुध्याद्यात्म्यजनान्तं कृत्वा स्वस्मिन् गौरीकलान्यासं कृत्वा अन्तर्यजनं कुर्यात्। ततः पञ्चशुद्धीः विध ाय द्वारपूजां कुर्यात्॥

देवालयद्वारमस्त्रमंन्त्रेण सामान्यार्घ्योदकेन प्रोक्ष्य

द्वारोर्ध्वदक्षिणे- ओं गं गणपतये नमः।
उत्तरे- ओं सं सरस्वत्यै नमः।

मध्ये- ओं श्रीं महालक्ष्यम्यै नमः।
दक्षिणपार्श्वे- ओं श्रीं नन्दिन्यै नमः।
वामपार्श्वे ओं श्री कमलिन्यै नमः।
(ओं श्रीं मालिन्यै नमः)।
ओं श्रीं मालिन्यै नमः)।
ओं श्रीं यमुनायैनमः।)
अग्रे पञ्चास्याय नमः।
ओं ह्रीं वृषभशक्त्यै नमः।

सर्वेभ्यो द्वारपालेभ्यो नमः।

इति गन्धापुष्पादिभिरभ्यर्च्य धूपदीपार्घ्याणि दत्वा अस्त्रेण विघ्नत्रयं नीत्वा घण्टाताडनादि वामपादपूर्वमन्तः प्रविश्य पाशुपतास्त्रेण देहलीमभ्यर्च्य यवनिकापिधानपूर्वकं गर्भगृहमुपगम्य गर्भावरणं पूजयेत्॥

तद्यथा नैरुऋत्यां ओं श्रीं वादीश्वर्यै नमः।
वायव्यां- ओं श्रीं क्रियाशक्त्यै नमः।
(ओं श्री किर्तिशक्त्यै नमः)
उत्तरस्यां- ओं श्री लक्ष्म्यै नमः)।
वारुण्यां- ओं श्रीं सरस्वत्यै नमः।
गोमुखे- ओं श्रीं मालिन्यै नमः।
ऐशान्यां- ओं श्रीं सुमालिन्यै नमः।

इति गर्भावरणशक्तीः सम्पूज्य देवीदक्षिणे रुचिरासने उपविष्य (देव्याः वामभागे सलक्षणं दीपस्तम्भं संस्थाप्य उद्दीप्यस्वेति दीपं प्रज्वाल्य कर्मसाक्षिणे दीपराजाय नमः। इति सम्पूज्य

भो दीप देवीरूपस्त्वं कर्म साक्षी ह्यविघ्नकृत्।

यावत्पूजासमाप्तिस्स्यात्तावत्वं सुस्थिरो भव॥

इति सम्प्रार्थ्य घण्टां सन्ताड्य कलशपूजां शङ्खपूजां च कृत्वा ओं हः अस्त्राय फडिति शङ्खोदकेन मूलदेवीं सम्प्रोक्ष्य निर्माल्यं ईशानदेशे चण्डेश्वर्यै समर्प्य हस्तं प्रक्षाल्य अनन्तादि पद्मासनपर्यन्तं पीठपूजां कुर्यात्॥

ओं हां आधारशक्त्यै नमः।
ओं हां अनन्तासनाय नमः।
अग्नेयादिकोणेषु- ओं हां धर्माय नमः।
ओं हां ज्ञानाय नमः।
ओं हां वैराग्याय नमः
ओं हां ऐश्वयार्य नमः।
पूर्विदिदिक्षु- ओं हां अधर्माय नमः।
ओं हां अज्ञानाय नमः।
ओं हां अवैराग्याय नमः।
ओं हां अनैश्वर्याय नमः।
मध्ये- ओं हां सिंहासनाय नमः।
तदुपरि विकसितपद्मासनं विभाव्य
ओं हां कन्दाय नमः।
ओं हां बीजाय नमः।
ओं हां मकुराय नमः।
ओं हां नाळाय नमः।
ओं हां पत्रेभ्यो नमः।
ओं हां दलेभ्यो नमः।
ओं हां केशरेभ्यो नमः।
ओं हां कर्णिकायै नमः।

ओं हां पद्मासनाय नमः। इत्यभ्यर्च्य

शुद्धजलेन विम्बं प्रक्षाल्य पुष्पमेकं शिरसि विन्यस्य सिंहापीठस्याग्नेयादि चतुरंघ्रिषु-

ओं हां कृतयुगाय नमः।
ओं हां त्रेतायुगाय नमः।
ओं हां द्वापरयुगाय नमः।
ओं हां कलियुगाय नमः।

ओं हां सकलगुणात्मकशक्तियुक्ताय महायोगपीठात्मने नमः। इति योगासनमभ्यर्च्य देवीदेहे गौरीकलामातृकान्यास मूलविद्यान्यास मन्त्राक्षरन्यास तत्वन्यासादि कृत्वा ध्यायेत्।।

एकवक्त्रां त्रिणयनां जटामुकुटसंयुताम्।
वरदाभयहस्ताढ्यां चतुर्देर्दण्डमण्डिताम्।।

ऊर्ध्वहस्ताम्बुजद्वन्द्व विराजितसरोरुहाम्।
दुकूलवसनोपेतां सर्वाभरणभूषिताम्।।

भुक्तिमुक्तिप्रदां देवीं सच्चिदानन्दरूपिणीम्।।
सदाशिवेश्वरहर श्रीशद्रुहिणमातरम्।।
समस्तगौरीलक्ष्म्यादि शक्तिचक्रस्य नायिकाम्।।
सिन्धूराभां त्रिणेत्राममृतशशिकलाशेखारीं
रक्तवस्त्राम्।
पीनोत्तुङ्ग प्रकृष्ट स्तनभरनमितां
यौवनारम्भरूढाम्।।

नानालङ्कारयुक्तां सरसिजनायनां
मन्त्रसङ्क्रान्तकूर्तिम्।
देवीं पाशाङ्कुशाढ्यामभयवरकरामम्बिकां तां
नमामि।।

इति वा यथामूर्तिरूपं ध्यात्वा

ओं ह्रीं गौर्यै नमः- इत्यावाह्य
ओं ह्रीं विद्यादेहायै नमः।
ओं ह्रीं नेत्रेभ्यो नमः।

इत्यभ्यर्च्य स्थापनादि पञ्चमुद्राःप्रदर्श्य गौरीगायत्र्या पाद्याचमनार्घ्याणि दत्वा ओं ह्रीं गौर्यै वौषडिति पुष्पाक्षतांश्च दत्वा पञ्चगव्य पञ्चामृतगन्धपुष्प हरिद्रा फलोदकहिरण्य नवरत्नोदकै: स्नपनशुद्धोकैश्च (रात्रिसूक्त) दुर्गामन्त्र-श्रीसूक्तादिभिरभिषिच्य वस्त्रं दुकूलकञ्चुकाभरणगन्धपुष्पमाल्य-हरिद्राकुङ्कुमकज्जलसिन्दूरकङ्कण्ठसूत्रादि सौभाग्यद्रव्याणि समर्प्य पद्मासनमभ्यर्च्य त्रिखण्डयोनिमहामुद्रां प्रदर्श्य, आवरणपूजां कुर्यात्॥

(1) प्रथमावरणे पूर्वाद्यष्टदिक्षु मध्ये च-

ओं श्रीं वामायै नमः।
ओं श्री रौद्यै नमः।
ओं श्रीं काल्यै नमः।
ओं श्रीं कलविकरिण्यै नमः।
ओं श्रीं बलविकरिण्यै नमः।
ओं श्रीं बलप्रमथिन्यै नमः।
ओं श्रीं सर्वभूतदमन्यै नमः।
ओं श्रीं मनोन्मन्यै नमः।

प्रथमावरणपूजां समर्पयामि।

(2) द्वितीयावरणपूजां करिष्ये-

पूर्वाद्यष्टदिक्षु-ओं ह्रीं ब्राह्मै नमः।
ओं ह्रीं माहेश्वर्यै नमः।

ओं ह्रीं कौमार्यै नमः।
ओं ह्रीं वाराह्यै नमः।
ओं ह्रीं इन्द्राण्यै नमः।
ओं ह्रीं चामुण्डायै नमः।
ओं ह्रीं दुर्गायै नमः।

द्वितीयावरणपूजां समर्पयामि।

(3) तृतीयावरणपूजां करिष्ये-

पूर्वाद्यष्टदिक्षु- श्री ओं हां हं हीं वृषभाय नमः कुण्डलिन्यै नमः)

श्रीं ओं हं हीं गणपतये (पद्मिन्यै नमः)।
श्रीं ओं हं हीं स्कन्दाय नमः (ह्लादिन्यै नमः)।
श्रीं ओं हं हीं महाशास्त्रे नमः (भृङ्गिण्यै नमः)।
श्रीं ओं हं हीं मन्दाय नमः। (भद्रायै नमः)।
श्रीं ओं हं हीं वीरभद्राय नमः (देवसेनायै नमः)।
श्रीं ओं हं हीं क्षेत्रपाल्यै नमः (अम्बिकायै नमः।
श्रीं ओं हं हीं भास्कराय नमः। (रूपिण्यै नमः)।

तृतीयावरणपूजां समर्पयामि।

4)चतुर्थावरणपूजां करिष्ये-

पूर्वाद्यष्टदिक्षु ऊर्ध्वे अधश्च-

ओं श्रीं शचीदेव्यै नमः।
ओं श्रीं स्वाहदेव्यै नमः।
ओं श्रीं कालकण्ठीदेव्यै नमः।
ओं श्रीं जातादेव्यै नमः (दाहिन्यै नमः)।
ओं श्रीं सुकेशीदेव्यै नमः (भोगिन्यै नमः)।

ओं श्रीं भद्रादेव्यै नमः (घोरायै नमः)।
ओं श्रीं श्रीहर्षिणीदेव्यै नमः (गम्भीरिण्यै नमः)।
ओं श्रीं जीवोन्मनीदेव्यै नमः (हर्षिण्यै नमः)।
ओं श्रीं सावित्रीदेव्यै नमः।
ओं श्रीं भूमिदेव्यै नमः (लक्ष्मीदेव्यै नमः)
चतुर्थावरणपूजां समर्पयामि।

पञ्चमावरणपूजां करिष्ये।

पूर्वाद्यादिक्षु- ओं ह्लीं वज्राय विलासिन्यै नमः
प्राणशक्त्यै
ओं ह्लीं शक्तये विप्रण्यै नमः (शक्त्यै)।
ओं ह्लीं दण्डाय याम्यै नमः (कोपात्मशक्त्यै)।
ओं ह्लीं शङ्खाय विमुख्यै नमः (गुणात्मशक्त्यै)।
ओं ह्लीं पाशाय विमलायै नमः (कोमलात्मशक्त्यै)
ओं ह्लीं ध्वजाय असिन्यै नमः (विषात्मशक्त्यै)
ओं ह्लीं गादयै श्रियै नमः (गदायै)
ओं ह्लीं त्रिशूलाय शूनिल्यै नमः (विवृतात्मशक्तये)
इन्द्रेशानयोर्मध्ये ओं ह्लीं चक्राय सुदृश्यै नमः
(माहात्म्यशक्त्यै)
निर्ऋतिवरुणयोर्मध्ये ओं ह्लीं चक्राय सुदृश्यै नमः
(मङ्गलात्मशक्त्यै)

पञ्चमावरणपूजां समर्पयामि। इत्यष्टसंस्कारैभ्यर्च्या॥

तदनन्तरं अष्टोत्तरशत त्रिशति सहस्रनामादिभिरभ्यर्च्य धूपदीपनैवेद्यता-म्बूलादि समर्प्य, नीराजनं कृत्वा, जातवेदस इति पञ्चदुर्गासृक्तेन पुष्पाञ्जलिं समर्प्य, छत्रचामाराद्युपचारानन्तरं चतुर्वेद जोपनिषच्छास्त्रपुराणागम स्तोत्रपठनादिभिः देवीं सन्तोष्य

राजाशीर्वादं विधाय प्रदक्षिण नमस्कारपूर्वकम पराधक्षमापणं संप्रार्थ्य पूजासाद्गुण्यार्थं यथाशक्ति मूलमनुं जप्त्वा-

"कामेश्वरि जगन्मातस्सच्चिदानन्दविग्रहे।
गृहाणार्चमिमां प्रीत्या प्रसीद परमेश्वरि॥

गुह्यादि गुह्यागोप्त्री त्वं गृहाणास्मत्कृतं जपाम्।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि॥"

इति देव्या वरदहस्ते पुष्पाक्षततोयान्वितकरेण पूजां जपं समर्प्य॥

"ज्ञानतोऽज्ञानतो वापि शस्त्रोक्तेन कृतं तु यत्।
तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वरि॥"

इति सम्प्रार्थ्य यवनिकामाच्छाद्य द्वाररक्षां विज्ञाप्य विरमेत्॥

Parivārārcana: worship of deities attending of Śiva within the sanctum and outside.

तत्तद्देवतासन्निधौ आसनमूर्तिमूलैरभ्यर्च्य यथामूर्तिरूपं ध्यात्वा पूर्वे-वृषेश्वरं। वृषवामभागे-भास्करं। अग्निदेशे-महेशं। दक्षिणे-मातः। दक्षिणे देवकोष्ठे-दक्षिणामूर्तिं। नैर्ऋते-गणेशं। पश्चिमकोष्ठे-विष्णुम्। वायौ-गुहम्। उत्तरे-ज्येष्ठां लक्ष्मीम्। गोमुखाग्ने-ब्रह्माणं। सौम्यै नृत्तमूर्ति-चन्द्रशेखरं च। ईशाने-क्षेत्रपालं-नवग्रहान्-ज्वरहरमूर्तिञ्च। दक्षिणे-मुनीन् भक्ताश्च तत्तन्नाममन्त्रेण मूलमन्त्रगात्र्यादिभिः संपूज्य धूपदीपनैवेद्यताम्बूलादीनि दद्यात्॥

Agni-kārya (daily fire-ritual in the Yāga-śāla

ऐशान्ये यागमण्टपे चतुरश्रं वृत्तं वा हस्तमात्रं अरत्निमात्रं वा त्रिमेखलसहितं विधिवत् निम्नोन्नतं कुण्डं परिकल्प्य। पूर्वास्य उत्तरास्यो वा ऊर्ध्वमेखलोपरि नाभि परिकल्प्य। पवित्रपाणिः

प्राणायाम सकलीकरणादि कृत्वा। प्रणवेन सामान्यार्घ्यं सादयित्वा कुण्डमर्घ्यजलेन सम्प्रौक्ष्य। अस्त्रमन्त्रेण गोमयेनोपलिप्य। हृदयेन मार्जनं विधाय। सद्योजातादि ब्रह्मपञ्चकैः द्रव्याणं शोधनं क्षालनं शोषणं प्लावनं प्रोक्षणं च कृत्वा कुण्डं पञ्चचूर्णैरलङ्कृत्य कुण्डपूर्वदक्षिणपश्चिमोत्तरमध्यमेषु क्रमेण निवृत्ति प्रतिष्ठा विद्याशन्ति शान्त्यतीतकला अभ्यर्च्य। अस्त्रेण त्रितन्तुनावेष्ट्य ब्रह्मविष्णुरुद्रानन्तादीन् सम्पूज्य। प्रागग्रत्रिरेखासु मध्ये दक्षिणवामयोः ब्रह्माणं वैवस्वतं सोमं, उदगग्रात्रिरेखासु मध्ये पश्चिमपूर्वयोः रुद्रं विष्णुं शक्रंञ्चावह्य। मध्ये वागीश्वरी-वागीश्वरौ सम्पूज्य गन्धादिभिरभ्यर्च्य। सूर्यकान्तोद्भवं महानसस्थं वा अग्निमादाय होतुरग्रे निधाय अग्निं मूलेनाभ्यर्च्य ततोऽग्निमध्ये मूलाधाराग्निं सुषुप्तिनाडीमार्गेण रमिति बीजेन कुम्भेकेन प्रोक्षिप्य रेचकेण बैन्दवाग्निना समरसीकृत्य अग्निं संयोज्य अभ्यर्च्य शिवाग्निं विभाव्य मूलेन सम्पूज्य क्रव्यादांशं अग्निशकलं नैरऋतौ निरस्य। अग्निमध्ये तत्वत्रयेण ब्रह्माङ्गकैश्च सम्पूज्य मूलेनावाह्य चैतन्यरूपं भावयित्वा कुण्डमध्ये-

> "श्यामरूपसुशरीरयौवनां
> सोममाल्यचिकुरावतंसकाम्।
> पूर्णसोमवदनां ऋतुमतीं भावयामि
> परमाग्निमातरम्॥"

इति ध्यात्वा ओं ह्रीं वागीश्वर्यै नमः। इति सम्पूज्य तत्समीपे-

> "त्रिणेत्रं पञ्चवदनं श्वेतवर्णं चतुर्भुजम्।
> वराभयाक्षमालाब्जधरां वागीश्वरं विभुम्॥"

इति ध्यात्वा ओं हां वागीश्वराय नमः- इत्यभ्यर्च्य अग्निं

ब्रह्माङ्गै कुण्डं परिभ्राम्य मूलेन भूमिष्ठजानुद्वयात्मकः हस्ताभ्यां अग्निं आनासाग्रमुद्धृत्य योनिनिमार्गेण संयोज्य पात्रं कुण्डनाभिदेशे संस्थाप्यं मूलेन सम्प्रोक्ष्य पुष्पाक्षतान् निक्षिप्य हृदयेनेन्धनं प्रोक्ष्य वर्मण समिन्धनैराच्छाद्य। अस्त्रमन्त्रेण प्रज्वाल्य, मूलेनाग्निं सम्पूज्य। अस्त्रणोभिमन्त्र्य सद्योजातेन गर्भाधानार्थमभ्यर्च्य हृदयेन तिलाहुतित्रयं हुत्वा। तृतीये मासि पुंसवनार्थं वामदेवेनाभ्यर्च्य शिरसा तिलाहुतित्रयं हुत्वा। जीवभूततोबिन्दुं निक्षिप्य षष्टे मासि सीमन्तोन्नयनार्थं अघोरेण सम्पूज्य शिखामन्त्रेण तिलाहुतित्रयं हुत्वा। वक्त्राङ्गकल्पनार्थं शिखामन्त्रेण त्रिवारमभिमन्त्र्य हुत्वा। शिखमन्त्रेण त्रिवार मभिमन्त्र्य दशमें मासि जननार्थं तत्पुरुषेण सम्पूज्य कवचेन तिलाहुतित्रयं हुत्वा। अग्निं जातं विभाव्य गर्भाशौचस्नानार्थं अग्निं दर्भाद्यैः सन्धुक्ष्य सूतकविमोचनार्थं कुण्डमस्त्रेणार्घ्याम्भसा सम्प्रोक्ष्य दर्भेणास्त्रेण सन्ताड्य वर्माणाभ्युक्ष्य प्राच्यादि दिक्षु दर्भैः परिस्तीर्य पूर्वादि चतुर्दिक्षु ब्रह्माविष्णुरुद्रानन्तमूर्तीः सम्पूज्य।

इन्द्रादिदिक्षु-ओं हां इन्द्राय नमः।
ओं हां अग्नये नमः।
ओं हां यमाय नम।
ओं हां निर्ऋतये नमः।
ओं हां वरुणाय नमः।
ओं हां वायवे नमः।
ओं हां कुबेराय नमः।
ओं हां ईशानाय नमः।
ईशान दक्षिणे- ओं हां ब्रह्मणे नमः।

निर्ऋति वामतः- ओं हां विष्णवे नमः। इति सम्पूज्य

''बालाग्निरूपं तनुरक्तवर्णं
षण्णेत्रवक्त्रत्रयसप्तजिह्वकम्।
करे स्रुवाज्यं व्यजनं च घण्टां शक्त्यक्षमाले
वरतोमरं धृतम्॥''

इति ध्यात्वा। ओं हां बालाग्नये नमः। इति सम्पूज्य। वामदेशे दर्भोपरि स्रुक्स्रुवौ घृतस्थालीं प्रतीतां प्रोक्षणीं समिधः कूर्च चरूथालीं कमण्डलुं च द्वंद्वमधोमुखानि सादयित्वा। प्रोक्षणपात्रमुत्तानीकृत्य प्रादेशमात्रे पवित्रे अन्तर्धाय, अप आसिच्य गन्धाक्षतादिभिः परिपूर्य त्रिरुत्पूय सर्वाणि पात्राणि प्रोक्ष्य पात्राण्युत्तानीकृत्य। अग्नेर्दक्षिणे सप्तदर्भकूर्चोपरि ब्रह्माणमावाह्य। वामो मध्यमेखलायां सकूर्चजलपूर्णप्रणीतां निक्षिप्य विष्णुबीजेन गन्धपुष्पादिभिः सम्पूज्य। प्रादेशमात्रमध्यकूर्चपवित्रं आज्यपात्रे निधाय आज्यमासिच्य, पश्चिमे अंगारान् नीत्वा तेष्वाज्यमधिश्रित्य द्वे दर्भाग्रे प्रच्छिद्य प्रक्षाल्य आज्ये प्रत्यस्य दर्भोल्मुकेन पर्यग्निकरणं कृत्वा तेन कूर्चेन हृदयेन त्रिस्संप्लावनं कृत्वा ग्रन्थि विस्रस्य प्रोक्ष्य, अग्नौ निक्षिप्य घृतपात्रं प्रदक्षिणं नीत्वा योन्यूर्ध्वे निधाय। स्रुवौ प्रक्षाल्य दर्भाग्रैः हृदयेन-अग्रं, मध्येन मध्यं, मूलैर्मूलं संसृज्य प्रोक्ष्य प्रताप्य, आज्यपात्रसमीते निधाय। आज्यमवलोड्य। पश्चिमयाम्योत्तरे वर्मनेत्रास्त्रमन्त्रैः परिधीन् परिधाय। ऊर्ध्वसमिधौ हृदा शिरसा च हुत्वा। अनुयाजसमिधं पृणीतोर्ध्वे हृदा विन्यस्य। आग्निं गंधपुष्पाद्यैः लोकपालांश्च तत्तद्देशे सम्पूज्य। अदितेन्वादिभिः। परिषिच्य। नेत्रेणास्त्रेण च तत्रैव-आज्याभिघारं कृत्वा। पञ्चदशेध्मानि सकृन्मूलन हुत्वा। वायव्यादाग्नेयान्तं स्रुवा सद्योजातेन हृदयेन च। नैर्ऋत्यादीशानान्तं-अघोरेण हृदयेन च सन्ततं धारां हुत्वा। सौम्ये तत्पुरुषेण, याम्ये ईशानेन, ऐन्द्रे शिखामन्त्रेण नेत्रपश्चिमे

शिखामन्त्रेणैकवारं, अग्निबीजेन पञ्चविंशतिवारं हुत्वा। सद्योजातादि ब्रह्मपञ्चकैः क्रमेण सप्तवारं पृथक् पृथक् हुत्वा। अग्निमध्ये-आसनं परिकल्प्य पञ्चावरणान्वितं शिवं ध्यात्वा गंधपुष्पादिभिरभ्यर्च्य मूलेन-आवरणदेवानामेकैकाहुतिं च हुत्वा। तदनन्तरं सर्वप्रायश्चित्तार्थं अघोरेण दशाहुतीर्हुत्वा। व्याहृतिहोमं विधाय। वसुभ्यो रुद्रेभ्य अदित्येभ्यो विश्वेभ्यो देवेभ्यः स्वाहा इति मन्त्रेण पूर्णाहुतिं हुत्वा। कवचेन परिधीन् हुत्वा ब्रह्मकूर्चग्रिन्थि विस्रस्य अनुयाजसमिधं (अयन्ते योन्निरु ऋत्वियो यतो जात इति) अग्नै निक्षिप्य। प्राणीतापात्रमादाय प्राच्यदिदिक्षिूर्ध्वञ्च पूर्णमसीत्यादिभिः प्रोक्ष्य प्रणीतापात्रमधोमुखं कृत्वा तेनैव तोयेन शांतिरस्त्विति सर्वतः प्रोक्ष्य आज्यशेषं नैऋत्यां रक्षसेन्द्रः तृप्तिं गच्छत्विति स्रावयित्वा। परिस्तरणान्यादाय, अर्घ्योदकेन सम्प्रोक्ष्य लेपकार्यं विधाय। परिस्तरणेषु साग्रमेकं विहाय, अग्रादादह्य तदेकं प्रोक्ष्य, आग्रेणादह्य, आज्यपात्रं स्त्रुवेणोद्धत्य, अहृतिं मूलेन हुत्वा, उत्तरतो निधाय। उपस्थानं कृत्वा नमस्काराञ्जलिमुद्रे प्रदर्श्य। धूपदीपार्घ्याणि दत्वा। स्थालिपाकोपरि रक्षां सङ्गृह्य देवायार्पयित्वा ब्रह्माङ्गेनाभ्यर्च्य धूपदीपार्घ्याणि दत्वा। बृहत्सामेति स्वललाटे धारयेत्॥

Homa (fire-oblations)

अथ-ऐशन्ये यागमण्टपे चतुरश्रं वृत्तं वा त्रिमेखलायुतं अरत्निमात्र विस्तारं पश्चिमे दक्षिणे वा, अश्वत्थपत्रवत् योन्या सहितं नित्याग्निकुण्डं परिकल्प्य तस्य दक्षिणभागे सौम्याभिमुखं सुखासने स्थित्वा। पवित्रपाणिः प्रणायाम करन्यास भूतशुध्यन्तर्यागान् कृत्वा। प्रणवेन सामान्यार्घ्यपात्रं परिकल्प्य। अर्घ्याम्भसा कुण्डस्य चतुर्दिक्षु प्रोक्ष्य। कुण्डस्य अघोरास्त्रेण मार्जनप्रोक्षण गोमयलेपनादि कृत्वा। तस्मिन् पश्चिमादितः

प्रागग्रां याम्यत उदगग्रां दर्भेण तिस्रो रेखा उल्लिख्य। तत्र दक्षिणे-ओं हां यमाय नमः। उत्तरे-ओं हां सोमाय नमः। मध्ये-ओं हां ब्रह्मणे नमः। इत्यभ्यर्च्यु सुषुम्नया- अग्निबीजेन मूलाध ारात् व्यक्तमग्निं विभाव्य निरीक्षणादि कृत्वा। कुण्ड परिभ्राम्य, अग्निं संहितामन्त्रेण प्रतिष्ठाप्य। तेनाऽभ्यर्च्य प्रोक्षणीपात्रमाज्य-स्थालीञ्चरुमिध्मं संस्थाप्य प्रोक्षण्यां प्रणवेन जलमापूर्य पुष्पं निधाय दर्भाग्रेण तदम्भसा सकलद्रव्याणि प्रोक्ष्य। अग्निं दर्भैः परिस्तीर्य।

उपरिमेखलासु- ओं हां ब्रह्मणे नमः।
ओं हां विष्णवे नमः।
ओं हां रुद्राय नमः।
ओं हां महेश्वराय नमः। इति सम्पूज्य
प्रागाद्यष्ठदिक्षु-ओं हां इन्द्राय नमः।
ओं हां अग्नये नमः।
ओं हां यमाय नमः।
ओं हां निरृतये नमः।
ओं हां वरुणाय नमः।
ओं हां वायवे नमः।
ओं हां सोमाय नमः।
ओं हां ईशानाय नमः।

इति दिक्पालान् सम्पूज्य, अग्निं पर्यग्निकरणेन क्रव्यादांशं निरऋतौ निक्षिप्य परिषिच्य वृद्धाग्निं ध्यायेत्।

''चतुर्भुजं वृद्धरूपं त्र्यक्षं पिङ्गुलवक्त्रकम्।
शिवाग्निमृषभारूढं वरशक्तिकरं भजे॥''

इति आसनमूर्तिमूलैरभ्यर्च्य आज्यस्थालीमस्त्रेण संशोध्य,

आज्यमापूर्य प्रताप्य त्रिधाऽभिमन्त्र्य कुण्डनाभौ दर्भविष्टरे स्थापयित्वा हुत्वा चरु। अगन्यै स्वाहेति षोडशसङ्ख्यय हुत्वा, अग्न आयाहि वीतय इति मन्त्रेण तथा प्रणवेन स्वाहान्तं पञ्चेध्मानि हुत्वा उपरि मेखलादेवानं हिविर्निवेद्य। अष्टदिक्षु इन्द्रादीनां बलिं दत्वा। पुनराज्येन व्याहृतिं हुत्वा ब्रह्माङ्गै हुत्वा, ओं हां अग्नये स्वाहेति हुत्वा पुनः परिषिज्य परिस्तणेन हुत्वा, अग्निमुद्रास्य पुष्पाण्यादाय देवस्य मूर्ध्नि न्यसेत्॥

Bali-haraṇa (ceremonial distribution of food-offerings ot the attendant-deities)

आचार्यः परिजनैः सार्धं बलिदानेश्वरसन्निधिमुपागम्य सामान्यार्घ्येण- अस्त्रेण सम्प्रोक्ष्य, आसनमूर्तिमूलैः गायत्र्या चाभ्यर्च्य कलान्यासं विधाय-

"वेदहस्तं त्रिणेत्रं च जटामुकुटमण्डितम्।
वरं मृगं करे वामे सव्ये परश्वभीति कौ॥
सर्वाङ्गसुन्दरं देवं व्याघ्रचर्मोत्तरीयकम्॥
वामे ह्युमां द्विनेत्रां च करण्डमकुटान्विताम्।
स्वयोत्पलधरां देवीं त्रिभङ्गीमन्यलम्बिताम्॥

इति ध्यात्वा। आवाहनं विधाय स्थापनादि पूर्वोक्तमुद्राः प्रदर्श्य धूपदीपार्घ्याणि दत्वा (अभिषेकं विधीय) वस्त्र गन्ध माल्याभरणादिभिः सम्पूज्यं देवं रङ्गोपरि विन्यस्य दृढं सम्बध्य देवदेव्यौ सम्पूज्य नैवेद्यधूपदीपार्घ्याणि दत्वा लोकपालानभ्यर्च्य छत्रादिसर्ववाद्योपचारपरिजनैस्सह आचार्यः अर्घ्यपात्रं सङ्ग्रह्यहविस्थालीसहित परिचारेण समं एकमात्रघण्टाताडनपूर्वकं स्वस्तिमङ्गलवाचकैः सार्धं द्वारस्य-अधः शिलायां दक्षिणोत्तरमध्येषु-उदकं विकीर्य तस्योर्ध्वे पुष्पं विन्यस्य संरक्ष्य, अवकुण्ठ्य दीपमुद्रां प्रदर्श्य बलिं गृहित्वा

ओं हां विघ्नाय स्वाहा।
ओं हां विघ्नेश्वराय स्वाहा।
ओं हां विघ्नराजाय स्वाहा।
इति बलिं दत्वा
दक्षिणे- ओं हां दण्डिने स्वाहा।
उत्तरे- ओं हां मुण्डिने स्वाहा।
अन्तर्वृषभाग्रे- ओं हां वृषभाय स्वाहा।
तत्पृष्ठदेशे- ओं हां संवर्तभूताय स्वाहा।
अग्निदेशे- ओं हां समावर्तभूताय स्वाहा।
दक्षिणे- ओं हां कण्डोदरभूताय स्वाहा।
तद्दक्षिणे- ओं हां कुण्डोडरभूताय स्वाहा।
ओं ह्रीं चण्डिकादेव्यै स्वाहा।
इत्यन्तं बलिं दत्वा
तत्पूर्वपश्चिमयोः- ओं हां वीरभद्राय स्वाहा।
ओं हां विघ्नेश्वराय स्वाहा।
इति बलिं दत्वा
नैरूऋते- ओं हां दीर्घदेहभूताय स्वाहा।
तत्पश्चिमे- ओं हां महागणपतये स्वाहा।
विमानपृष्ठे- ओं हां ह्रस्वदेहभूताय स्वाहा।
वायव्ये ओं हां सिंहरूपभूताय स्वाहा।
तत्पश्चिमे- ओं हां गुं गुहभूताय स्वाहा।
तस्या प्राच्यां- ओं हां ज्येष्ठाय स्वाहा।
उत्तरे ओं हां गजमुखभूताय स्वाहा।
तद्दक्षिणे- ओं दुं दुर्गायै स्वाहा।
तत्पूर्वे ओं हां सूर्याय स्वाहा।
ऐशान्ये- ओं हां प्राङ्मुखभूताय स्वाहा।

इत्येवं बलिं दत्वा द्वितीयावृत्यां तद्द्वारस्य दक्षिणोत्तरयोः-

ओं हां आमोदाय स्वाहा।
ओं हां प्रमोदाय स्वाहा।
द्वितीय वृषभाग्रे- ओं हां आमोदाय स्वाहा।
ओं हां प्रमोदाय स्वाहा।
द्वितीय वृषभाग्रे- ओं हां वृषभाय स्वाहा।

तत्पृष्टे- ओं हां लं इन्द्राय स्वाहा-इति बलिं दत्वा,

धूपदीपश्रुतिज्ञान गीतातालमर्द्दळनृत्तवाद्यादि विज्ञाप्य, अग्न्यादीशानान्तं तत्तन्नाम्ना स्वाहान्तेन बलिं दत्वा, तस्य दक्षिणे- ओं हां क्षेत्रपालाय स्वाहा। इति बलिं दत्वा।

तृतीयावरणार्थं द्वितीयावरणे- पुनरावृत्य
नैऋते- ओं हां विष्णवे स्वाहा।
ऐशान्ये- ओं हां ब्रह्मणे स्वाहा।
इत्येवं बलिं दत्वा

भूतपीठस्य पूर्वदेशे बेरमुत्तराभिमुखं नीत्वा अर्घ्योदकेन पीठं प्रक्षाळय कुमुदोपरि, अष्टदिक्षु, इन्द्रादि देवताः सम्पूज्य,

तदुपरि पट्टिकोपरि उत्तरदेशे- ओं हां ब्रह्मणे नमः।

ब्रह्मेशानयोर्मध्ये- ओं हां आदित्येभ्यो नमः।
ईशान- इन्द्रयोर्मध्ये- ओं हां क्षेत्रपालाय नमः।
इन्द्राग्नेययोर्मध्ये- ओं हां अश्विनीभ्यां नमः।
यमाग्नेययोर्मध्ये- ओं हां पितृभ्यो नमः।

निऋतिवरुणयोर्मध्ये- ओं ही अप्सरगणेभ्यो नमः।
वरुणवायव्ययोर्मध्ये- ओं हां मुनिभ्यो नमः।
वायुसोमयोर्मध्ये- ओं हां वसुभ्यो नमः।
सोमेशानयोर्मध्ये- ओं हां रुद्रेंभ्यो नमः।
इत्यभ्यर्च्य

पीठबाह्ये प्राच्यां- ओं हां पिशाचगणेभ्यो नमः।
दक्षिणे- ओं हां यक्षेभ्यो नमः।
पश्चिमे- ओं हां रक्षेभ्यो नमः।
उत्तरे- ओं हां गन्धर्वेभ्यो नमः।
पूर्वोत्तरं ओं हां भूतेभ्यो नमः।

इति सम्पूज्य तदुपरि दलाष्टके- अष्टशक्तीः सम्पूज्य

ततः कर्णिकामध्ये- ओं हां अविघ्नाय नमः।
पूर्वदले- ओं हां प्रमदाय नमः।
याम्यदले- ओं हां प्रमोदाय नमः।
पश्चिमदले- ओं हां सुमुखाय नमः।
उत्तरदले- ओं हां दुर्मुखाय नमः।
ईशानदले- ओं हां विघ्नहन्त्रे नमः।

इत्यभ्यर्च्यद्व एवं देवभ्यः स्वाहान्तेन बलिं दत्वा मध्ये-नालिकेरप्रमाणमन्नं बलिं दत्वा धूपदीपार्घ्याणि दत्वा अनन्तरं पीठशुद्धिं विधाय तस्मिन् पुष्पं निधाय, बलिदेवं यथास्थानं निवेश्य-अभ्यर्च्य, नैवेद्य धूप दीपार्घ्याणि दत्वा सर्वोपचारान् विज्ञापयेत्।

Pāduka-pūjā (brief worship in the cell where the processional icon is kept)

उत्सवेश्वरालयमुपगम्य पादुकानाथं स्थालिकोपरि विन्यस्य

ओं हां पादुकेश्वरासनाय नमः।
ओं हां पादुकेश्वरमूर्तये नमः।
ओं हां पादुकेश्वराय नमः।
इत्यभ्यर्च्य ध्यायेत्॥

दाडिमीसुमसङ्काशं ऊर्ध्वकेशं त्रिणेत्रकम्।
पाशाङ्कुशधरं देवं शूलकह्लारहस्तकम्॥

श्वेतार्कमालिकाभूष्यं पीतवस्त्रधरं शुभम्।
पादुकारूपमित्युक्तं ध्यात्वा देवं विभावयेत्॥

इति ध्यात्वा मूलेनावाह्य वस्त्रगन्धमाल्याभरणैरलङ्कृत्य। अस्त्रेण पादुकां संपूज्य संरक्ष्य, अवकुण्ठ्य, धेन्वस्त्रलिङ्गमहामुद्राः प्रदर्श्य नैवेद्यधूपदीपार्घ्यादिकं दत्वा स्थालिकां परिचारकशिरस्यधि रोप्य

सर्ववाद्योपचारैस्समं प्राकारप्रदक्षिणपूर्वकं देवाग्रे विन्यस्य, आचार्यः पुष्पैः समं चुलुकोदकं गृहीत्वा

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वव स्थिते॥

यत्किञ्चित्कर्म हे देव सदा सुकृतदुष्कृतम्।
तन्मे शिवापदस्थस्य भुङ्क्ष्व क्षपय शङ्क॥

शिवो दाता शिवो भोक्ता शिवः सर्वमिदं जगत्
शिवो ज्यति सर्वत्र यः शिवस्सोऽहमेव तु॥

इति शिवस्य वरदहस्ते (मूललिंगस्य मूर्ध्नि वा) समर्प्य

स्वमिन्सर्व जगन्नाथ यावत्पूजावसानकम्।

तावत्त्वं प्रीतिभावेन लिङ्गेऽस्मिन्सन्निधिं कुरु॥

इति संप्रार्थ्य मूलेन देवं क्षमस्वेति-अष्टपुष्पैः सम्पूज्य॥

पुष्पलिङ्ग

चतर्भुजं त्रिणेत्रं च जटामकुटमण्डितम्।
हरिणीटङ्कसंयुक्तमभीति वरदान्वितम्।
शुक्लयज्ञोपवीतं च शुक्लमालाविभूषितम्॥

इति ध्यात्वा, आवाह्य नैवेद्यधूपदीपार्घ्याणि दत्वा, ब्रह्माङ्गैरभ्यर्च्य पूर्वोक्त लिङ्गस्थापित स्थालिंकां वस्त्रेणाऽऽवृत्य शुद्धशैवशिरसि वाहयित्वा वाद्यैः सार्धं मूलमन्त्रेण- अन्तरावृत्य वृषश्वरस्कन्धे संयोज्य, सर्वदेवप्रीत्यर्थं भरतोक्तवत् शुद्धनृत्तं कारयित्वा, विधिवत् प्रदक्षिण नमस्कारस्तोत्रजपतोध्यानानि विधाय, लिङ्गदेवं पूर्ववदष्टपुष्पैरभ्यर्च्य, निरोधार्घ्यं दत्वा, तिरस्करिणीं विधाय, बहिरुपम्य चण्डालयं गच्छेत्।

Worship of Caṇḍikeśvara

चण्डिकेश्वरालयं गत्वा, देवस्य निर्माल्यमानीय तदग्रे संस्थाप्य चण्डबिम्बं शुद्धोदकेनाभिषिच्य आसनमूर्तिं मूलैरर्चयेत्।

ओं हां चण्डासनाय नमः।
ओं हां चण्डमूर्तये नमः।
ओं हां चण्डाय नमः।
इत्यभ्यर्च्य ध्यायेत्।

द्विनेत्रं पीतवर्णं च जटामुकुटमण्डितम्।
परशुं दक्षहस्ते तु ऊरुहस्तंतु वामतः॥
लम्बितं दक्षिणं पादं शयितं वामपादकम्।

यज्ञसूत्रालङ्कत्तं तं चण्डेशं च महाप्रभम्॥

इति वा यथामूर्तिरूपं ध्यात्वा स्थापनादिमुद्राः प्रदर्श्य, तौलादिभिरभिषिच्य वस्त्रगन्धपुष्पदामादिभिः सम्भूष्य

ओं हां चण्डेश्वराय फट् नमः।
इत्यभ्यर्च्य
ओं हां चण्डेश्वराय हृदयाय नमः।
ओं हीं चण्डेश्वराय शिरसे स्वाहा।
ओं हीं चण्डेश्वराय शिखायै वषट्।
ओं हैं चण्डेश्वराय कवचाय हुं।
ओं हौं चण्डेश्वराय नेत्रत्रयाय वौषट्।
ओं हां चण्डेश्वराय अस्त्राय फट्-इत्यङ्गानि
सम्पूज्य

देवस्यान्नपानादि निर्माल्याताम्बूलादिकं निवेद्य, धूपदीपार्घ्याणि दत्वा सर्वोपचारान् विधाय

चण्डेश्वर महाभक्त शिवध्यानपरायण।
निर्माल्यभोजनं तुभ्यं प्रदत्तं तु शिवाज्ञया॥

इत्याज्ञां संश्राव्य, चण्डमूलेनार्घ्यं दत्वा, पुनः-चण्डमूलेन हृदयाय हुं फट् स्वाहेति नमस्कारं कृत्वा, पराङ्मुखार्घ्यं दत्वा विसृज्य, पुनश्चण्डाष्टकस्तोत्रपठननमस्कारादिकं कृत्वा, मूलमन्त्रजपं यथाशक्ति विधाय

नीलकण्ठ पदाम्भोज परिस्फुरितमानस
शम्भोस्सेवाफलं देहि चण्डेश्वर नमोऽस्तु ते॥

इत्येव त्रिवारं करावास्फोट्य (तालत्रयपुरस्सरं) प्रार्थनां कुर्यात्।

The elaborate worship is thus performed in the morning. A brief worship is conducted in the afternoon called mādhayāhnika pūjā after which food offerings to the deity are distributed among the devotees assembled in the shrine. The sequence called pradośa-pūjā involves the worship of the iconic representation of Śiva as Naṭarāja (or Tāṇḍaveśara); and this is followed by evening pūjā, sāyampūjā), also done briefly, during night, and finally the deity is put to bed in the sequence known as śayanotsava, which is described below:

ततः शयनमूर्तिं भद्रं कर्णेभिरिति मन्त्रेण शिबिकामारोप्य स्वस्तिसूक्तपाठकैः ताम्बूलच्छत्रचामराद्युपचारद्रव्यकरदीपा-दिधारिभः नानाविधस्तोत्रपाठकैः वीणावेण्वादिवाद्यैः गद्यपद्यादिमङ्गलगीतपाठकैः सुवासिनीभिश्च सह शनैः शनैः प्रथमावरणं प्रदक्षिणीकृत्य ब्रह्मस्थाने-अष्टपुष्पैरभ्यर्च्य। आरात्रिकं परिभ्राम्य। शयनमन्दिरं प्रविष्य घृतदीपौ प्रज्वाल्य नानालङ्कारभूषितमञ्चोपरि दोलायां भोगनायकीसहितमहेशं (नित्यकल्याणमूर्तिं, उमामहेश्वरं वा) संस्थाप्य। आसनमूर्तिमूलैरभ्यर्च्य ध्यायेत्-

"एकवक्त्रं त्रिणेत्रञ्च कुन्दाभं सुन्दरं प्रभम्।
परश्वभीतिहस्तञ्च दधतञ्च वरं मृगम्॥
मौळिगङ्गाधरं देवं कर्णपत्रञ्च कुण्डलम्।
शायितं वामपादञ्च लम्बितं तु दक्षिणं पदम्॥
सर्वगन्धसुप्ताङ्ग सर्वामाल्यैरलङ्कृतम्।
चित्राम्बरधरं सौम्यं सर्वमङ्गलकारणम्॥

श्यामवर्णां द्विनेत्रां च करण्डमकुटान्विताम्।
हेमवस्त्रधरां देवीं सर्वाभरणभूषिताम्॥

कुमुदं सव्यहस्तेन दधतीमूरुहस्तकाम्।
पद्ममध्ये निषण्णां तां प्रसन्नवदनामुमाम्॥
एवं ध्यात्वा परां देवीं मूलेनावाहयेद्गुरुः।

यो रुद्रो अग्नौ-गौरीमिमायेति द्वाभ्यां देवदेव्यौ सम्पूज्य क्षीरान्न पायसपूप कदलीफल क्षीरपानीय मुखवासं, एलालवङ्गकर्पूरजाती फलामोदभरितं ताम्बूलम् नारिकेळादि पञ्चफलपूर्वकं निवेद्य, नीराजनादि राजोपचारैः देवदेव्यौ सन्तोष्य मूर्धानमिति मुकुरं दर्शयित्वा। चामरबर्हिपिञ्छादिभिः संवीज्य। पूजां समाप्य। पूर्वादिदिक्षु सायुधान् लोकपालानभ्यर्च्य। वीणावेणुमङ्गलगीतवाद्यरावैस्सहं डोलाचालनं विधाय। तिरोध ानंपटमाच्छाद्य। शञ्चम इत्यनुवाकं जप्त्वा रक्षादीपं प्रज्वाल्य, रक्षेशम्मभ्यर्च्य, अस्त्रेण कवाटबन्धनं कवचेन-अर्गलक्षेपणं वामदेवेन यन्त्रिकायां यन्त्रितं च कृत्वा द्वारबाह्ये भीमरुद्रं, द्वाररक्षकत्वेन-अभ्यर्च्य। मूलस्थानं गत्वा। प्रदक्षिणनमस्कार पूर्वकमपराधक्षमापणं सप्रार्थ्य। पूर्वमर्पितमालाद्य-लङ्करान् गृहीत्वा। यवनिकां पिधाय। चण्डेश्वरालयमुपगम्य। पूर्ववत्सम्पूज्य निर्माल्यं समर्प्य, पूजासांगतासिद्धिं संप्रार्थयेत्॥

Chapter III

NITYĀRCANĀ-VIDHI (According to Tantra-sāra)

I. PREAMBLE

The worship of Viṣṇu in his arcā-form is unique feature of the Pāñcarātra division of *Āgama. Tantra sāra-samgraha* provides the Tattva-vāda outlook of this Āgama division and also the ritualistic and ideological framework for daily worship of Viṣṇu in households and temples. This is given here as an illustration of the major sequences of worship. This is of course a sectarian version; and there are differences in the hymns employed. But the procedure is more or less common to all sects.

II. PREPARATION (External)

(1) The priest gets up early in the morning, attends to his morning ablutions, has his bath, performs his sandhyā (which includes prāṇāyāma) and goes through japa and pārāyaṇa.

(2) He collects fresh water (pure, from a natural source like river or well) in five metallic pots (preferably copper or silver), or at least in one. The five pots are for (i) snāna, bathing the icon, (ii) kumbhābhiṣeka (iii) naivedya-prokṣaṇa, sprinkling upon the food-offerings; (iv) pañca-pūraṇa, for filling five small vessels used during the

sequences of worship, and (v) pānīya, offered to the deity as water for drinking. The mouths of the pots are covered with clean cloth (just washed and dried)

He prepares sandal-paste (gandha) and unbroken consecrated rice (akṣata) for worship. He collects fresh tulasī leaves, and flowers suitable for Viṣṇu.

(3) He approaches the sanctum, having washed his feet, hands and mouth and after ceremonially sipping water thrice (ācamana). He stands in front of the shrine, and with hands joined in supplication recites:

ॐ नारायणाय परिपूर्णगुणार्णवाय
विश्वोदयस्थितिलयोन्नियतिप्रदाय।
ज्ञानप्रदायविबुधासुरसौख्य दुःख
सत्कारणाय वितताय नमो नमस्ते॥

(4) Then he seeks the permission of the door-guardians in the four directions for entering into the sanctum

(i) पूर्वद्वारे द्वारश्रियै नमः। जयाय नमः। विजयाय नमः॥ (east)

(ii) दक्षिणद्वारे द्वारश्रियै नमः। बलाय नमः प्रबलाय नमः॥ (south)

(iii) पश्चिमद्वारे द्वारश्रियै नमः। नन्दाय नमः। सुनन्दाय नमः॥ (west)

(iv) उत्तरद्वारे द्वारश्रियै नमः। कुमुदाय नमः। कुमुदाक्षाय नमः॥ (north)

(5) Then he opens the door to the sanctum, reacting

वायवायाहि दश ते मे सोमा अरं कृताः।
तेषां पाहि श्रुधीहवम्॥

(6) Clapping his hands thrice, and putting forth is right

foot first, he enters into the sanctum without stepping on the threshold

अग्निनाग्निः समिध्यते कविर्गृहपतिर्युः।
हव्यवाड् जुह्वासः॥

(7) He then trims the wicks of the oil lamp and brightens the light, reciting:

वन्दे विष्णुं नमामि श्रियमथ च भुवं ब्रह्मवायू च।
वन्दे गायत्रीं भारतीं तामपि गरुडमनन्तं भजे रुद्रदेवम्।
देवीं वन्दे सुपर्णीं अहिपतिदयितां वारुणीमप्युमाम।
तामिन्द्रादीन् काममुख्यानपि सकलसुरांस्तद्गुरून् मद्गुरूंश्च॥

He bows to all goods residing in the sanctum and seeks their permission.

III PREPARATION (INTERNAL)

(1) The priest cleans the precincts of the sanctum, arranges the articles, and sets about clearing the place from all evil influences by the rite of bhūtoccāṭana:

अपसर्पन्तु ये भूता ये भूता भुवि संस्थिताः।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥
अपक्रामन्तु ये भूताः क्रूराश्चैव तु राक्षसाः।
ये चात्र निवसन्त्येव देवता भुवि सन्ततम्।
तेषामविरोधेन ब्रह्मकर्म समारभे॥

(b) Then the priest tries to ward off the effect of human breath within the sanctum (manuṣya-gandha nirharaṇa) by reciting the Vedic hymn:

(अपैवेत्यस्य मन्त्रस्य गयप्रातऋषिः। विश्वेदेवा देवताः। अनुष्टुप् छन्दः। मनुष्यगन्धनिर्हरणे विनियोगः॥)

अपैवा बीभत्सन्तमनुष्यगन्धात्त एते धाय्ये
अन्तरदधत।
येभ्यो माता मधुमत् पिन्वते पयः पीयूषं
द्यौरदितिरद्रिबर्हाः। उक्त शुष्मान् वृषभरांस्त्वप्नशस्तां
आदित्यां अनुमदा स्वस्तये॥
ये वा पित्रे विश्व देवाय वृष्णे यज्ञैर्विधेम नमसा
हविर्भिः। बृहस्पते सुप्रजा वीरवन्तो च वयं स्याम
पतयो रयीणा्॥

He folds his hands, bends his head ('kṛtāñjali-puṭo bhūtvā vinayāvanata-kandharah,) and prays:

मानसान् वाचिकान् पापान् क्षमस्व पुरुषोत्तम।
वैष्णवद्वेषहेतून्मे भस्मसात्कुरु माधव॥

आयताभ्यां विशालाभ्यां शीतलाभ्यां कृपानिधे।
करुणारसपूर्णाभ्यां लोचनाभ्यां विलोकय॥

(2) He puts up a cloth as screen between himself and the deity (javanikā), climbs the platform on which the deity is installed, and recites the Brahma-pāra-stotra for obtaining eligibility for worship.

(ब्रह्मपारस्तोत्रस्य कण्डुऋषिः। विश्वेदेवता देवता। त्रिष्टुप् छन्दः।

पूजाधिकारसिध्द्यार्थे जपे विनियोगः॥)

प्रचेतस ऊचुः-

ब्रह्मपारं मुने श्रोतुमिच्छामः परमं स्तवम्।
जपता कण्डुना देवो येनाराध्यत कशवः॥

सोम उवाच-

पारं परं विष्णुरनन्तपारः परः पराणामपि पारपारः।
स ब्रह्मपारः परपारभूतः परः परेभ्यः परमार्थरूपी॥

स कारणं कारणतस्ततोऽपि तस्यापि हेतुः परहेतुहेतुः।
कार्येषु चैवं स हि कर्मकर्तृरूपैरशेषैरवतीह सर्वम्।

ब्रह्म प्रभुर्ब्रह्म स सर्वभूतो ब्रह्म प्रजानां पतिच्युतोऽसौ।
ब्रह्माव्ययं नित्यमजं स विष्णुरपक्षयाद्यैरखिलैरसंगी॥

ब्रह्माक्षरमजं नित्यं यथाऽसौ पुरुषोत्तमः।
तथा रागादयो दोषाः प्रयान्तु प्रशमं मम॥

(य एतद्ब्रह्मपाराख्यं संस्तवं परमं जपन्।
अवाप परमां सिद्धिं स समाराध्य केशवम्॥)

IV. COMMENCEMENT

(1) Still screened from the deity, he rings the bell (ghaṇṭāvādana), reciting

आगमार्थं तु देवानां गमनार्थं तु राक्षसाम्।
कुर्वे घण्टारवं तत्र देवताह्वानलांछनम्॥

(अज्ञानात् ज्ञानतो वापि कांस्यघण्टा न वादयेत्।
राक्षसानं पिशाचानां तद्देशे वसतिर्भवेत्।
तस्मात् सर्वप्रयत्नेन घण्टामावादयेत्ततः॥)

घण्टाग्रे ब्रह्मदैवत्यं मुकुटे रुद्रदेवतम्।

नादे सरस्वती चैव नाले नागादि देवताः॥

(2) Then, he takes off the screen and sets about removing the old flowers from the deity's body (nirmālya-śodhana, or visarjana), all the while reciting the Vedic hymn, and covering his mouth with a cloth:

सक्तुमिव तित उना पुनंतो यत्र धीरा मनसा वाचमक्रत।
अत्रासखायं सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि॥

(3) Then he removes the cloth that covered his mouth, and invites the deity to get ready for receiving the worship. This he does folding his hands and bending his head. He recites, keeping the 'nirmālya' in his hands:

(i) कृताञ्जातिपुटो भूत्वा विनयानत कन्धरः।
याचे त्वां देवपूजार्थमुत्तिष्ठ त्वं रमापते॥

(ii) (उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे।
उप प्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भवास च॥)

(iii) स्वामिन् कृपया पूजार्थमुत्तिष्ठ।
आयताभ्यां विशालाभ्यां शीतलाभ्यां दयानिधे।
करुणामृतपूर्णाभ्यां लोचनाभ्यां विलोकय।

(iv) नारायणाय विद्महे। वासुदेवाय धीमहि।
तन्नो विष्णुः प्रचोदयात्॥

(4) (a) He visualizes a golden bowl on the left side of the deity and puts all the old flows there on the earth, reciting

भूं भुवे नमः।

(b) Then he takes a śālagrāma out of its box (sampuṭa), and places it the heap of old flowers, saying:

सालग्रामनिवासाय क्षीराब्धिशयनाय च।
श्रीशैलाद्रिनिवासाय शिलावासाय ते नमः॥

(c) Then water from the conch is poured on the śālagrāma reciting the Vāgaṁbhraṇī-sūkta (or Devī-sūkta.)

(d) The conch too receives the abhiṣeka (pouring of water on it) to the accompaniment of Śrī-sūkta.

(e) The water collected form the abhiṣeka done to śālagrāma (called nirmālya) is poured on the image of Hanumān (that must be present within the sanctum)

This completes the preparatory ritual of worship; and the sequence of actual (or major) worship (pradhāna-pūjā) begins.

V. PRĀRTHANĀ and SAMKALPA

(1) The preliminary paryers offered relates the worshipper to the worshipped as pratibiṁba (reflection) and bimba (object) respectively:

(i) नि षु सीद गणपते गणेषु त्वामाहुर्वि प्रथमं कवीनां।
न ऋते त्वक्रियते किंचनारे महामर्कं मघवं चित्रमर्च॥

(ii) आराध्यसे प्राणभृतां प्रणेत्रा प्राणाधिनाथेन समीरणेन।
नारायण ज्ञानसुखैकपूर्ण स्वामिन् मम श्रीरमण प्रसीद॥

(iii) बिम्बोऽसि प्रतिबिम्बोऽस्मि तव यद्यपि चान्तरम्।
स्वामिन्निर्दोष मद्दोषं विरेचय नमोऽस्तु ते॥

(iv) भगवन् यन्मया कर्म शुभं कारयसे प्रभो।
तत्सर्वं विष्णुपूजाऽस्तु तव देव प्रसादतः॥

(v) जयाच्युत जयानन्त जय कृष्ण हरे प्रभो।
जय केशव लक्ष्मीशेत्युक्त्वा कृष्णं प्रपूजयेत्॥

(2) Having seated himself properly, the priest mediates on God and performs prāṇāyāma. For sanctifying the seat and the posture, he recites:

(पृथिव्याः मेरुपृष्ठ ऋषिः। कूर्मो देवता। सुतलं छन्दः आसनप्राणायामे विनियोगः।)

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥

(देवीं गायत्री छन्दः। प्राणायामे विनियोगः।)

ॐ भूः। ॐभुवः। ॐसुवः। ॐमहः। ॐजनः। ॐतपः। ॐ सत्यम्। ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥ ॐ॥

Then he makes the following solemn resolve:

अनन्तकल्याणगुणैकसिन्धो ब्रह्माण्डसाहस्त्रपते दयाले। भक्त्या पूर्वोक्त शुभतिथौ श्रीभारतीरमणमुख्यप्राणान्तर्गत श्रीलक्ष्मीवेंकटेशप्रेरणया श्रीलक्ष्मीवेंकटेशप्रीत्यर्थं भगवतो बलेन भगवतो वीर्येण भगवतस्तेजसा भगवतः कर्मणा भगवता संजीवितस्वान्तवपुः चिदिन्द्रियोऽहं अनन्तावतारगुणक्रियात्मक

श्री वासुदेवस्य यथाशक्ति तन्त्रसारोक्त ध्यानावाहनादि षोडशोपचारपूजां करिष्ये।

VI. KALAŚA-PŪJĀ AND ŚAṀKHA-PŪJĀ

(1) The five metallic pots (or one pot) containing water are arranged in front of the deity. Sandal-paste is applied on the belay of each pot, and consecrated rice-grains are put inside the water along with some sandal paste and tulasī leaves. The following prayer is offered; keeping the right hands on the mouth of the main pot.

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥

कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा।
ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः।
अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः॥

अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा।
आयान्तु देवपूजार्थं अभिषेकार्थमादरात्॥

सर्वे समुद्राः सारितस्तीर्थानि च ह्रदा नदा।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः॥

गंगे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥

इमं मे गंगे यमुने सरस्वति शतद्रु स्तोमं सचता परुष्ण्या।
असिक्न्या मरुद्वृधे वितस्तयार्जीकीये श्रुणुह्या सुषोमया॥

ओं भूः भुवः सुवः भूर्भुवः सुव इति

The hand gestures in front of the pots.

(i) removing the poisons (nirviṣī-karaṇa) by tārkṣya-mudrā
(ii) making it nectarine (amṛtīkaraṇa) by dhenu-mudrā
(iii) making it pure (pavitrī-karaṇa) by śaṁkha-mudrā
(iv) protecting it (samrakṣaṇa) by cakra-mudrā
(v) securing it in all directions (dibandhana) by gadā-mudrā

(d) आपो वा इदं सर्वे विश्वा भूतान्यापः प्राणो वा आपः पशव आपोन्नमापोऽमृतमापः सम्राडापो विराडापः स्वराडापश्छन्दांस्यापो ज्योतीश्चापो यजूंष्यापो सत्यमापः सर्वा देवता आपो भूर्भुवस्सुवरापः ॐ॥

(e) कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं बलम्।
योग्यतां पापहानिं च पुण्यवृद्धिं च साधयेत्॥

सर्वतीर्थमयो यस्मात् सर्वक्षेत्रमयो यतः।
अतो हरिप्रियोऽसि त्वं पूर्णकुम्भ नमोऽस्तु ते॥

(अनेन कलशदेवतापूजनेन भगवान्
भारतीरमणमुख्यप्राणान्तर्गत-श्रीलक्ष्मीनारायणः प्रीयताम्।)

(f) From the water in the pot (or pots) all the aritcles of worship are sprinkled, more particularly the conch. Then the conch is filled with the water from the pot while reciting the gāyatri hymn, and worshipped.

(2) The conch is addressed with the śamkha-gāyātrī

पाञ्चजन्याय विद्महे। वासुदेवाय धीमहि। तन्नो शंखः प्रचोदयात्।

As above tārkṣya and other mudrās are shown, and the

mantra ओं नमो नारायणाय is recited twelve times keeping the right hand on the conch

शंखमूले ब्रह्मणे नमः। शंखमध्ये जनार्द्रनाय नमः।
शंखे चन्द्रार्काभ्यां नमः। वरुणाय नमः। पृष्ठे
प्रजापतये नमः।

अग्रे गंगा
सरस्वतीभ्यांनमःत्रिलोकीगतसमस्ततीर्थदेवताभ्यो नमः।
शंखदेवतान्तर्यामि श्री भारतीरमणमुख्यप्रणान्तर्गत
श्रीलक्ष्मीनारायणाय नमः।।

(b) Then the upacāras from āvāhana to puṣpa are offered The conch is again touched by the right hand, the following vereuss are recited

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे।
नमितः सर्वदेवैश्च पांचजन्य नमोऽस्तु ते।।

गर्भा देवारिनारीणां विशीर्यनते सहस्त्रधा।
तव नादेन पाताले पांचजन्य नमोऽस्तु ते।।

दर्शनेन हि शंखस्य किं पुनः स्पर्शनेन च।
विलयं यान्ति पापानि हिमवद् भास्करोदये।।

नत्वा शंखं करे धृत्वा मन्त्रेणानेन वैष्णवः।
यः स्नापयति गोविन्दं तस्य पुण्यमनन्तकम्।।

शंखं चन्द्रार्कदैवत्यं मध्ये वरुणदैवतम्।
पृष्ठे प्रजापतिस्तत्राग्रे गंगा सरस्वति।।

त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया।
शंखे तिष्ठन्ति विप्रेन्द्र तस्माच्छंखं प्रपूजयेत्।।

(c) Then the water from the conch is sprinkled on all the articles of worship and on himself; the remaining water is poured out; and the conch is washed and kept on its seat, while reciting the śaṁkha-gāyātrī five times.

VII. PĪṬHA-PŪJĀ

(1) The five vessels used in worship (pañca-pātra) for different sequences in ṣoḍaśopacāra are arranged as follows and deities are invoked in them after putting in them sandal-paste, tulasī-leaves and flowers.

(i) North-west (vāyavya): arghya-pāra, containing water for pouring into the hands of the deity as a from of welcome. The priest assumes the dāna-mudrā in his hands and recites **अर्घ्यपात्रे लक्ष्मीमावाहयामि।**

(ii) South-west (nairṛtya): pāda-pātra, water for washing the feet of the deity; añjali-mudrā; **पाद्यपात्रे सरस्वतीमावाहयामि।**

(iii) North-east (īśānya): ācamana-pātra, water for ceremonial sipping, gokarṇākṛti-mudrā; **आचमनपात्रे रतिमावाहयामि।**

(iv) South-east (āgneya): snānīya-pātra, water for bath, hamsa-mudrā **स्नानीयपात्रे वरुणमावाहयामि।**

(v) In the centre (madhye madhu-parka pātra, sūkarī mudrā **मधुपर्कपात्रे पितामहमावाहयामि।** and punar-ācamanīya,

(vi) water for second ceremonial sipping, hamsa-mudrā, **पुनारचमनीये शान्तिमावाहयामि।**

(The ṣoḍaśopacāra-pūjā is worship with sixteen sequences)

(2) The five nectarine articles (pancāmrta) offered to

the deity are arranged as follows, and deities are invoked in them assuming the dhenu-mudrā, after making the resolution.

अथ श्रीविष्णुपूजां पञ्चामृतपूजां करिष्ये।

(i) east: cures (dadhi): **दध्नि दधिवामनमावहयामि।**

(ii) south: clarified butter (ghṛta): **आज्ये विष्णुमावाहयामि।**

(iii) west: honey (madhu): **मधुनि मधुसूदनमावाहयामि।**

(iv) north: sugar (śarkarā): **शर्करायामच्युतमावाहयामि।**

(v) centre: milk (kṣīra): **क्षीरे गोविन्दमावाहयामि।**

(In the coconut (phala), Nārāyaṇa is invoked). Finally-

पञ्चामृतदेवताभ्यो नमः।

(3) Pīṭha-pūjā (pedestal-worship) can be brief (samkṣipta) or elaborate (vistṛta)

(a) When brief, the formula is:

विष्णोरासनभूताय दिव्यरत्नमयाय च।
प्रधानपुरुषेशाय महापीठाय ते नमः॥

चक्राब्जमण्डले पीठपूजां कर्तुं गुर्वज्ञास्वीकारार्थं गुरुपूजां करिष्ये॥

पीठमध्ये परदेवतायै श्रीलक्ष्मीनारायणाय नमः। वामो गुरवे वायवे नमः। दक्षिणे सर्वदेवताभ्यो ब्रह्मरुद्रादिभ्यो नमः। पुनर्वामे सर्वगुरुसनकसनन्दनादिभ्यो नमः॥ एतैरनुज्ञातः पीठपूजां करिष्ये॥

(b) The elaborate worship of the deity's pedestal involves the employment of cakrābja-maṇḍala; various divinities are invoked in the specified areas of the maṇḍala. And permission is sought formally from the guru, and this by itself becomes a preliminary ritual of visualizations:

VIII. BIMBĀVĀHANA

(1) Then the icon is consecrated (saṁśodhana) with the seed-syllables visualizing the downward-oriented heart-lotus with 'om yam', making it upward-oriented by 'om', and opening its petals by shedding on it the rays of the sun of knowledge (jñānārkeṇa). On the pericarp of the lotus Sūrya is invoked, above it Soma, and on top of the two, Agni:

सूर्यमण्डलाभिमानिने सूर्याय नमः।
तदुपरि सोममण्डलाभिमानिने सोमाय नमः।
तदुपरि अग्निमण्डलाभिमानिने अग्नये नमः।

(b) Lakṣmī is visualized as the lotus of eight petals (situated in the devotee's heart) and Viṣṇu is invoked in the centre of that lotus. The soul of the devotee is imagined as the reflection (pratibimba) of Viṣṇu (bimba). And mental worship is offered to Viṣṇu as the devotee's own Bimba (source, sustenance and master), seated in the heart-lotus.

(c) Then the Bimba (inner controller) is transferred by the devotee to the icon on the pedestal for the sake of formal worship, with his hands cupped in supplication, keeping tulasī leaves and flowers in them.

आत्मा देवानां भुवनस्य गर्भे यथावशं चरति देव एषः।
घोषा इदस्य श्रृण्विे न रूपं तस्मै वाताय हविषा विधेम॥
ॐ नमो नारायणाय एह्येति हृत्पद्मस्थितश्रीपुरुषोत्तम।
आवाहयामि पीठे त्वां प्रतिमायां रमापते॥

(d) The invocatory mudrās (six in number) are shown and flowers are placed at the feet of the deity:

(i) एह्येहि। मम हृत्पद्मस्थित श्रीनृसिंह प्राज्ञहरिनामकरूप-त्रयात्मक भगवन्तं श्रीलक्ष्मीनारायणं पीठास्थिते तद्धातुमयप्रतिमान्तः स्थिततेजः सारमयप्रतिमान्तः स्थित मुख्यप्राणा प्रतिमामध्ये। रमया सह क्षीरनीरवदासीन स्वप्रतिमायामावाहयामि।।

(आवाहनमुद्रां प्रदर्श्य, पादयोः पुष्पाञ्जलिं समर्प्य।)

(ii) सान्निध्यं कुरु देवेश सर्वसम्पत्करो भव।
विभो सकललोकेश जिष्णो विष्णे हरे प्रभो।।
त्वां भक्त्या पूजयाम्यद्य भोगैरघ्यादिभिः क्रमात्।।
यागावसानंपर्यन्तं अत्र स्थित्वा जनाद्रन
भक्तस्य मम पूजां च गृहीत्वा पाहि मां प्रभो।।

(इति प्रार्थनमुद्रया संप्रार्थ्य)

(iii) ॐ नमो नारायणाय आवाहितो भव (āvāhana-mudrā)। स्थापितो भव (sthāpana-mudrā) । सन्निहितो भव (sannidhāpana-mudrā) सन्निरुद्धो भव sannirodha-mudrā) सम्मुखो भव (sammukhī-karaṇa-mudrā) A आवगुण्ठितो भव avaguṇṭhana-mudrā)

(इति षण्मुद्राः प्रदर्श्य)

(e) Then tattva-nyāsa and mātṛkā-nyāsa are performed for the icon.

(f) Keeping consecrated rice-grains and flowers in hand, the invocation is made with the verse:

जितं ते पुण्डरिकाक्ष नमस्ते विश्वभावन।
सुब्रह्मण्य नमस्तेऽस्तु नमः पुरुषपूर्वज।।

(i) Mūla-mantra is uttered, and

ॐ भगवन् आगच्छागच्छ ॐ आवाहयामि।

IX. ABHIṢEKA

(1) Preliminary prayer is offered:

(a) उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे
उप प्रयन्तु मरुतः सुदानव इन्द्र प्रा सूर्यवा स चा॥

(b) एहि भगवन् विष्णो स्नानार्थं मज्जनालयाम्॥

(c) इदं विष्णुर्वि चक्रमे त्रेधा निदधे पदम्।
समूळ्हमस्य पांसुरे॥

(पादुके समर्पयामि) (presenting sandals for the feet)

(d) भद्रं कर्णेभिः श्रुणुयाम देवा भद्रं पश्येमाक्षिभिर्यजत्राः।
स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः॥

(While imagining the deity seated on the snāna-pīṭha)

(2) ॐ नमो नारायणाय विद्महे। वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्।

(i) water for the hands is offered through the hands of Lakṣmī

ॐ नमो नारायणाय। लक्ष्मीहस्तेन अर्घ्यं समर्पयामि।

(ii) water for the feet is offered through the hands of Sarasvatī

ॐ नमो नारायणाय। सरस्वतीहस्तेन पाद्य समर्पयामि।

(iii) water for sipping is offered through the hands of Rati

ॐ नमो नारायणाय। रतिहस्तेन आचमनीयं समर्पयामि।

(iv) Madhu-parka is offered through the hands of Brahma

ॐ नमो नारायणाय। पितामहहस्तेन मधुपर्कं समर्पयामि।

(v) water for second sipping is offered from the hands of Śānti

ॐ नमो नारायणाय शान्तिहस्तेन पुनराचमनीयं समर्पयामि।

(3) Bath with five nectarine articles (pañcāmṛta) is given (दुग्धं च शर्करा चैव घृतं दधि तथा मधु) in the following order: dadhi, glṛta, madhu, śarkarā and kṣira, followed by coconut water

(4) Bath with pure water (śuddhodaka-snāna) is administered to the accompaniment of Puruśa- sūkta recitation. Water is used for this purpose from the snānīya-pot; it is poured into conch, and abhiṣeka for the deity is performed.

(5) Final bath is given from the water stored in Kumbhodaka-pot, directly from the pot (and not through conch)

Viṣṇu-sūkta, Vāmana-sūkta and Gharma-sūkta may be recited during this bath.

(6) The icon is then cleaned dry from a cloth (while reciting mūla-mantra twelve times) and decorated:

(a) A pair of fresh garments is offered (vastra-yugma)

युवं वस्त्राणि पीवसावधे युवेरच्छिद्रामन्तवो ह सर्गाः।

(वस्त्रयुग्मं समर्पयामि)

(b) ornaments like kaustubha, and weapons like cakra are offered (आभरणानि समर्पयामि)।

(c) sacred chord (yajñopavīta) is offered reciting the familiar hymn यज्ञोपवीतं परमं...(ब्रह्मसूत्रं समर्पामि)।

(d) seat (āsana) is offered, and three water-libations are given (arghya-traya)

(e) sandal-paste (gandha) is applied with the hymn गन्ध द्वारां... दुराधर्षां मगन्धान् समर्पयामि

(f) consecrated rice-grains (akṣatān) are offered अक्षतान् समर्पयामि।

(g) flowers are offered

अयने ते परायणे दुर्वारोहन्तु पुष्पिणीः।
ह्द्याश्च पुण्डरीकाणि समुद्रस्य गृहा इमे।।
दूर्वादि सर्वपुष्पाणि समर्पयामि।

(h) Āvaraṇa pūjā is done with the names 'Keśavāya namah' etc.

X. NAIVEDYA-SAMARPAṆA

1. Incense is offered (dhūpa)

वनस्पत्युद्भवो दिव्यो गन्धाढ्यो गन्ध उत्तमः।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्।।

(b) waving of light before the deity, with three ghee-soaked cotton strands

(i) ध्येयं सदा परिभवघ्नमभीष्टदोहं।
तीर्थस्पदं शिवविरिञ्चिनुतं शरण्यम्।
भक्तर्तिहं प्रणतभक्तभवाब्धिपोतम्।
वन्दामहे पुरुष ते चरणारविन्दम्।।

(ii) नारायणाय परिपूर्णगुणार्णवाय।
विश्वोदयस्थितिलयोन्नियतिप्रदाय।
ज्ञानप्रदाय विबुधासुर सौख्य दुःख
सत्काराणाय वितताय नमो नमस्ते॥

(iii) साज्यं त्रिवर्तिसंयुक्तं वह्निना योजितं मया॥
दीपं गृहाण देवेश त्रैलोक्यतिमिरापह॥
भक्त्या दीपं प्रयच्छामि देवाय परमात्मने।
त्राहि मां नरकात् घोराद्दिव्यज्योतिर्नमोस्तु ते॥

2. (a) In front the deity, on the right side, a square-maṇḍala is drawn with ranga-valli powders, and the letters 'om śrīm om' are also drawn inside the diagram. Vessels containing cooked food-offerings are placed on this maṇḍala, and the food-offerings are sprinkled with ghee. Another maṇḍala, drawn beside it is meant for placing water, coconut, betel leaves, fruits etc.

(b) After sprinkling ghee over the cooked articles of food, tulasī leaves are placed on them. Some water is papered into the depression of the right hand, and consecrating this water with the mantra **ओं नमो नारायाणाय** repeated eight times it is thrown on the articles of food with the mantra **ओं भूर्भुवः स्वः सत्यं त्वर्तेन परिषिञ्चामि।** water for sipping is offered to the deity:

ओं भूर्भुवः स्वः सत्यं त्वर्तेन परिषिञ्चामि
अमृतोपस्तरणमसि। महालक्ष्मीसमेतस्य विष्णो ते
दक्षिणे करे।
आपोशनं दीयमानं पिब देव रमापते॥

(c) Final water for sipping after food is eaten (āpośana) is given through the hands of Lakṣmī; this water is dropped into the arghya-pātra, with this mantra:

सुधारसं सुविपुलं आपोशनमिदं तव।
गृहाण त्वं सुरश्रेष्ठ यथेष्ठ यथेष्ठमुपभुज्यताम्॥

(d) Arghya-water is offered:

(i) प्राणाय स्वाहा ॐ नमो अनिरुद्धायेदं न मम।
(ii) अपानाय स्वाहा ॐ नमो प्रद्युम्नायेदं न मम।
(iii) व्यानाय स्वाहा ॐ नमो संकर्षणायेदं न मम।
(iv) उदानाय स्वाहा ॐ नमो वासुदेवायेदं न मम।
(v) समानाय स्वाहा ॐ नमो नारायणायेदं न मम॥

(e) With folded hands with tulasī leaves, prayer is offered:

अद्य तिष्ठति यत्किञ्चित् कल्पितं चापरं गृहे।
पक्वमन्नं सुपानीयं सर्वोपस्करसंयुतम्।
यथाकालं मनुष्याद्यै र्भोक्ष्यमाणं सुरैरपि।
तत्सर्वं विष्णुपूजास्तु प्रीयतां में जनाद्रनः॥
रमाब्रह्मादिभिर्देवैर्नियमेन समर्पितम्।
भक्त्यानुग्रहकामेन स्वीकर्तव्यं त्वया प्रभो॥

ॐ नमो नारायणाय। सर्वोपस्करयुतं अन्नादि
महानैवेद्यं समर्पयामि॥

(f) मध्ये मध्ये पानीयं समर्पयामि। Then uttarāposana, signalling the end of the eating session is given, with अमृतापिधानमासि स्वाहा उत्तरापोशनं समर्पयामि॥

(g) Water for washing hands (hasta-prakṣālana), cleaning the teeth (danta-śodhana), rinsing the mouth (gaṇḍūśa) and the washing the feet (pāda-prakṣālana) is offered in order. Finally water for sipping (ācamana) is offered.

(h) Tāṁbūla (areca-nut, betel-leaves, limes and camphor) is offered:

पूगीफलसमायुक्तं नागवल्लीदलैर्युतम्।
कपूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम्॥
(ताम्बूलं समर्पयामि।)

XI. NĪRĀJANA (ĀRĀTRIKĀ)

(1) (a) Incense is again offered with the mantra नारायणाय परिपूर्ण गुणार्णवाय।

अर्चत प्रार्चत प्रियमेधासो अर्चत।
अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत॥

(b) श्रिये जातः श्रिय अनिरियाय श्रियं वयो जरितृभ्यो दधाति।
श्रियं वसाना अमृतत्वमायन् भवन्ति सत्या समिधामितद्रौ॥
श्रिय एवैनं तच्छ्रियमादधाति सन्ततमृचा वषट्कृत्यं सन्तत्यै सन्धीयते प्रजाय पशुभिर्य एवं वेद॥

With these hymns, the light is waved in the circumambulatory order (pradakṣiṇa), ringing the bell all the while-

(i) 3 times before the feet of the deity (pādau):
(ii) 3 times before the middle portion of the deity (madhya)
(iii) 3 times before the face of the deity (mukha);
(iv) 3 time before the entire body of the deity (sarvānga)
(2) Mantra-puṣpa (hymns as floral offerings) is recited:

(i) यो नः पिता यो विधाता धामानि वेद भुवनानि विश्वा।

यो देवानां नामधा एक एव तं सं प्रश्नं भुवना यन्त्यन्या स्वस्ति॥

(ii) संसृष्टं धनमुभयं समाकृतमस्मभ्यं
दत्तां वरुणाश्च मन्युः भियं दधाना
हृदयेषु शत्रवः पराजितासो अप निलयन्ताम्॥

(iii) नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवेभ्यो नम आश्विनेभ्यः॥
यजाम देवान्यदि शुक्रवाममाज्याय सः शं समा वृक्षि देवाः॥

(iv) ॐ राजधिराजाय प्रसह्य शायिने नमो वयं वैश्रवणाय कुर्महे।
स मे कामान् कामकामाय मह्यं कामेश्वरो वैश्रवणो दधातु॥

कुबेराय वैश्रवणाय महाराजाय नमः।

(v) यो वै तां ब्रह्मणो वेद
अमृतेनावृतां पुरीं।
तस्मै ब्रह्म च ब्रह्मा च
आयुः कीर्तिं प्रजां ददुः।

तासामाविरभूच्छैरिः स्मयमानमुखाम्बुजः।
पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः॥

(iv) ओं नमो नारायणाय॥
छत्रं। चामरं। व्यजनं। दर्पणं। गीतं। स्तोत्रं समर्पयामि।
समस्तराजोपचारान् समर्पयामि॥

XII. ŚAMKHA-BHRĀMAṆA

(1) The conch is waved in front of the deity to ward off the evil that arises forms standing in the shadow of the deity. The formula for the purpose is:

बिम्बछायादोषपरिहारार्थं शंखभ्रमणं करिष्ये।

(a) Pure water is poured into the concen; dhenu-mudrā and other mudrās are shown before it and the mantra ओं नमो नारायणाय is recited.

(b) The the conch with the water in it is taken in the hand, and waved before the deity three times in the circumambulatory order (prādikṣiṇena):

(i) once from foot of the deity to the top of the crown, (पादादिमुकुटपर्यन्तं)

(ii) once from the navel of the deity to the crown. (नाभ्यादि मुकुटपर्यन्तं)

(iii) once from the heart of the deity to the crown. (हृदयादि मुकुटपर्यन्तं)

(c) While this is being done, the following mantra is recited:

इमा आपः शिवतमा इमा आपः सर्वस्य भेषजीः।
इमा राष्ट्रस्य वर्धिनीरिमा राष्ट्रभृतोऽमृताः॥

(d) Then the water in the conch is poured into a vessel. This is known as śamkha-tīrtha.

(2) (a) Reciting the Baḷitthā-sūkta, the conch and the image of Hanumān are given a bath, cleaned dry and kept on their seats. Sandal-paste and flowers that have already been offered to the deity are now offered to the conch and Hanumān.

दिव्यगन्धानुलिप्ताङ्ग दिव्यमालाविभूषितम्।
शेषाहिभोगविपुले सुखासीनं मनोरमम्॥

श्रीभूमिसहितं देवं ललाटे श्वेतमृत्स्नया।
कृतोर्ध्वपुण्ड्रतिलकमण्डितं चण्डभानुभिः॥

नियुतैरयुतैश्चन्द्रैर्विद्युत्कालग्निकोटिभिः।
समवेतैरिवैकत्र तेजः पुञ्जैर्विसर्पिभिः॥

भ्राजमानं दुरालोकं देहमण्डलनिर्गतैः।
भास्सयन्तं जगत्सर्वं ध्यायाम्यात्मानमच्युतम्॥

(d) He thereafter assumes cakra-mudrā and performs 'japa' with the help of a rosary (akṣa-mālā), or counting

the finger-digits (kara-mālā), one hundred and eight times, or twenty-eight times or eight times. He completes the japa with the prayer:

पुण्डरीकाक्ष विश्वात्मन् मन्त्रमूर्ते जनाद्रन।
गृहाणास्मिन् जपं नाथ मम दीनस्य शाश्वत॥

The prescription regarding the manner in which the japa must be conducted are given as follows:

जपकाले जपेन्मन्त्रं न द्रुतं न विलम्बितम्।
लक्षीकृत्वाऽच्युतं ध्यायन्तदधीनमनोमतिः॥

अपिशं भगवद्बिम्बमापीठावलोकयन्।
जपं समाप्य विधिवन्न्यसेन्मयि कृतं जपम्॥

VIII. Balī-yātrā

(i) Also called nityotsava, the icon meant for this purpose (bali-bera) is taken out in a procession, along with a vessel containing cooked rice, a basket of flowers and a vessel of water. The icon is either mounted on a palanquin (śibikā) or carried by an attendant priest on his head. The food-offerings are made in the presence of, and with the permission of, this icon which deputises for the main icon in the sanctum. Regarding the quantity of food-offering (bali), *Sāra-samuccaya says*:

उत्तमं कबलं प्रोक्त मध्यमं मुष्टिमात्रकम्।
अधमं त्वाहुतेर्मानं बलिमानं त्रिधा भवेत्॥

The food-offerings are made to the attendant deities (Viṣṇu-pārśada) in all the enclosures of the temple, especially the door-guardinans (dvara-pālaka) and Garuḍa. The remainder of the food-offerings carried is placed on the main bali-pīṭha in front of the shrine, after washing

the top of it clean and uttering the formula: ओं विष्णुपार्षदेभ्यो नमः।

दिक्षु सर्वासु सर्वेषु मन्दिरावरणेषु च।
नृत्तं गेयं च वाद्यं च साकल्येन समीरितम्॥
खगध्वजं दर्शयित्वा मङ्गलाष्टकमेव च।
सन्निधाने च देवस्य सर्वत्र बलिरिष्यते॥
निवेद्य तत्र ताम्बूलं भक्ष्यं च पृथुकादिकम्।
सर्वेष्वावरणेष्वेवं स्थानं प्रति समाचरेत्॥
कवलाम्बुजनादेन प्राकारद्वारनिर्गमः।
निर्गत्य च महापीठे मन्दिराभिमुखं स्थितः॥
दिक्षु सर्वासु पीठस्य वादित्रे घोषिते भृशं।
क्षालिते पीठिकामूर्ध्नि पूज्येद्विष्णुपार्षदान्।
बलिं निरवशेषेण दत्वा पीठस्य मूर्धानि॥

After the offering of bali on the bali-pītha, the party circumambulates the bali-pīṭha and returns to the shrine; Then the bali-bera is taken into the sanctum, and its power is formally returned to the main deity mūla-bera.

(ii) When this sequence is completed, the doors of the sanctum are closed signifying that the day's pūjā has ended. The priests go round the shrine and return home.

According to *Pādma- samhitā,* the worship ending with bali-utsava is among the best.

उत्सावावसितं श्रेष्ठमाराधनमुदीरितम्।
होमान्तं मध्यमं प्रोक्तं प्रापणान्तमथाधमम्।
क्षुद्रं तु धूपदीपान्तमधमाराधनं भवेत्॥

कालभेदेषु सर्वेषु श्रेष्ठं कालत्रयं विदुः।

प्रातर्माध्यन्दिनं रात्रिर्मुख्यं च कमलासन॥
(अवश्यभाविनौ तेषु बलिनित्योत्सवावुभौ।
होमपर्यन्तमन्यत्र कालभेदेषु शस्यते॥)

IX Śayyāsana

This is done at night as the last sequence of worship. The deity is here formally put to bed and allowed to rest in yoga-nidrā:

स्वामिन् लक्ष्मीश भगवन् सर्वज्ञ पुरुषोत्तम।
शय्यासनं मया क्लृप्तं योगनिद्रमुपाश्रय॥

A request is thus made by the priest offering flowers to the main icon. The icon meant to receive this last sequence of worship (i.e. śayana-bera) is formally worshipped invoking in it the power from the main icon (mūla-bimba). The icon along with its consorts is then taken to the apartment where the bed has been ritualistically prepared. Arghya, pādya, ācmana, sandal paste, and flowers are offered to the icon after it has been made to rest on the bed; and the tāmbūla (mukha-vāsa) is also presented. The priest finally prostrates before the icon:

सर्वं न्यूनातिरिक्तं च मया पूर्वं हि यत्कृतम्।
तत्सर्वं देवदेवेश क्षन्तुमर्हसि मे प्रभो॥

and offers flowers with both hands cupped (puṣpāñjali):

He attends to the nitya-dīpa in the apartment, and comes out, closing the door behind him with kavaca-mantra. He beseeches Cakra and Garuda to guard the doors (dvāra-rakṣā), and circumambulating the shrine goes home.

EXCERPTS FROM SĀTTVATA-SAMHITĀ

(भद्रपीठशोधनं)

यकिञ्चित् पत्रपुष्पाद्यं परिदृश्येत पीठगम्।
पणिना तत्समाहृत्य शुचिस्थाने निधाय वै।

गव्यैर्वा चामरैर्वालैः शिखिपक्षैः कुशैरथ।
संमार्ज्य भद्रपीठं तु वाससा सुसितेन वा॥

बहुना वस्त्रपूतेन वारिणा तदन्तरम्।
प्रक्षाल्य द्वादशार्णेन प्रणवाद्यन्तकेन तु॥

चक्रराजार्चनम्।

सर्वलोकमयं तत्र सर्वदेवसमाश्रयम्।
सर्वाधारमयं ध्यायेदन्तर्लीनं तु चक्रराट्॥

(पात्रपरिकल्पनम्।)

प्रणवेन स्वनाम्नाथ नमोन्तेनार्चयेच्च तम्।
अर्घ्यालभनधूपैस्तु माल्यैर्नानास्रगुद्भवैः॥

ततः कुम्भचतुष्कं तु हेमादिद्रव्यनिर्मितम्।
गालितेनाम्भसा पूर्णं स्रगाद्यैरप्यलङ्कृतम्॥

गन्धसर्वौषधीरत्नफलबीजकुशोदकम्।
बहिः कोणचतुष्के तु न्यसेदाधारपृष्ठगम्॥

ॐ अर्घ्यं कल्पयामीति ह्युक्त्वा वायुपदे न्यसेत्।
कलशं तद्वदैशान्यां न्यसेदाचमनार्थतः॥

स्नानार्थमग्निकोणे तु पाद्यार्थं नैऋते तथा।
अथ मङ्गलकुम्भानामुपकुम्भसमन्वितम्॥

चतुष्कं विन्यसेद् बाह्ये दिक्क्रमेण सुपूजितम्।
भगवद्बिम्बपूर्वं तु यागाङ्ग प्रागुदीरितम्॥

एकं सुलक्षणं तत्र ततो मध्येऽवतार्य च।
भुक्तमर्घ्यादिकं तस्मादपीनीयाभिवन्द्य च।

उशीरवंशकूर्चेन क्षालयेदम्भसा ततः।
पुराङ्कितं तु चक्राद्यैर्यथाबद्धं तु वा शुभम्॥

सलिलेनार्घ्यपात्रं तु सम्पूर्याग्रे निधाय वै।
तिलान् सुमनसस्तस्मिन् दूर्वाः सिद्धार्थकान् क्षिपेत्॥

(आवाहनम्।)

चतुरावर्तयेन्मन्त्रं कृत्वा पाणितले स्थितम्।
ततः सर्वगतं देवं मन्त्रमूर्तित्वमागतम्॥

समाहूय स्वमन्त्रेण त्वागच्छान्तपदेन तु।
यथा सर्वगतो वायुर्व्यजनेन महामते॥

व्यक्तिमभ्येति भगवानाहूतस्तद्वदेव हि।
भावदर्पणसङ्क्रान्तं कृत्वा हृत्कमलात्तु वै॥

(उपचारसमर्पणम्।)

सन्निरुध्य बहिर्वेद्यां मन्त्रोच्चारावसानतः।
मन्त्रमागच्छमानं तु निर्गतं तु स्वकात् पदात्॥

कालं पाद्यार्घ्यदानान्तमुत्थितं भावयेत् सदा।
अथोपचर्यमाणं तं भोगैः कालानुकूलतः॥

स्नानालभनवस्त्रंस्रग्दानेऽलङ्करणे तथा।
अन्यत्र भोगपूजायां स्मरेत् पद्मासनादिना॥

पुनस्तमेवोपरिष्टं सानुकम्पं च सम्मुखम्।
बिम्बं विनाऽन्यत्राधारे भवत्येवं महामते॥

बिम्बाकृत्यात्मना बिम्बे समागत्यावतिष्ठते।
करेत्यमूर्तामखिलां भोगशक्तिं तु चात्मसात्॥

विनिवेद्यासनवरं समाहूतस्य वै प्रभोः।
पादपीठं तु सामान्यं मृद्वास्तरणभूषितम्॥

पाद्यार्घ्ये मधुपर्कं च तोयमाचमनीयकम्।
सपुत्रदारमात्मानमष्टाङ्गपतनेन तु॥

(स्नानासनम्।)

चेतसा भक्तियुक्तेन निवेद्य तदनन्तरम्।
भगवानथ विज्ञाप्यः कृत्वा तत्पादगौ करौ॥

सफुटीकृतं मया देव त्विदं स्नानवरं त्वयि।
सपादपीठ परमं शुभं स्नानासनं महत्।
आसादयाशु स्नानार्थं मदनुग्रहकाम्यया।

स्नानासनं निवेद्याथ देवस्य द्वितयं तु वै॥

भक्तिनम्रेण शिरसा दद्यादर्घ्यं तु मूर्धानि।
विनिवेद्य ततो हैमं सरत्नं च प्रतिग्रहम्॥

दद्याद्वै पाद्यकलशात् पाद्यं पादाम्बुजद्वये।
सुशुभे पादुके चाथ तदन्ते स्नानशाटकम्॥

सुगन्धशालिसम्पूर्णं मात्रार्यं पात्रमुत्तमम्।
दर्पणं पूर्णचन्द्राभं गन्धतोयमनन्तरम्॥

पाणिभ्यां क्षालनार्थं तु पादपीठं ततः शुभम्।
दन्तकाष्ठं च तदनु मुखशुद्धिप्रतिग्रहम्॥

जिह्वानिर्लेखनं चैव मुखप्रक्षालनं तु वै।
पुनराचमनं देयमभ्यङ्गर्थमनन्तरम्॥

तैलं बहु सुगन्धं च चूर्णं गोधूमशिलिजम्।
रजनीचूर्णसम्मिश्रमीषत् पद्मकभावितम्॥

देयमुद्वर्तनार्थं तु चमषी तदन्तरम्।
स्नानार्थं खलिसंयुक्तं तोयमुष्णमनन्तरम्॥

चन्दनं मुखलेपार्थं घृष्ठं कर्पूरभावितम्।
गव्यं प्रभूतं स्नानार्थं क्षीरं दधि घृतं मधु॥

ऐक्षवं तु रसं हृद्यमभावे शार्करोदकम्।
धात्रीफलोदकं चैव लोध्रतोयमनन्तरम्॥

रक्तचन्दनतोयं च रजनीनीरमुत्तमम्।
ग्रन्थिपल्लववार्येव ततस्तु तगरोदकम्॥

प्रियङ्गुवारि तदनु मांसीजलमतः परम्।
सिद्धार्थकोदकं चैव सर्वौषधिजलं ततः॥

पत्रपुष्पोदके चैव फलबीजेदके तथा।
गन्धोदकं च तदनु हेमरत्नजले ततः।

पुण्यतीर्थसरित्तोयं केवलं तदनन्तरम्।
स्नानार्थं कल्पितेनैव ह्युदकेन विमिश्रितम्॥

योक्तव्यं क्रमशो ह्योदतर्घ्यपुष्पसमन्वितम्।
अन्तरान्तरयोगेन स्नानानां च महामते॥

क्षालनं चार्घ्यकलशादर्घ्यदानं समाचरेत्।
सम्पूर्णमम्भसां कुम्भं हरिद्रशालितण्डुलैः॥

गन्धादिभिश्च संलिप्तमथ युक्तं स्रगादिना।

पाणौ कृत्वा तमेकस्मिन्नपरस्मिंस्तु मल्लकम्॥

(भद्रासनशोधनम्।)

धूमायमानं सिद्धार्थैभ्राम्य मूर्ध्नि बहिः क्षिपेत्।
सुधौतमहतं चाथ शाटकं विनिवेद्य च॥

कचोदकापकषार्थमपरं देहवारिहृत्।
अधरोत्तरवस्त्रे द्वे गन्धधूपाधिवासिते॥

प्रणालभागादपरं स्थानं भद्रसनात् तु वै।
भूरिनीरघटैः शुद्धं कृत्वा तत्रावतार्य च॥

सपीठं भगवद्बिम्बं तद्विना वार्चितं यदि।
खप्लुतं भावयेद् देवं निःशेषं क्षालयेत् पुनः॥

भूयो गन्धोदकेनैव पूर्यं कुम्भचतुष्टयम्।
स्नानकुम्भं विनान्येषां प्रग्वत् कार्या च कल्पना॥

(अलंकारासनम्।)

मध्येऽवतार्यो भगवान् विनिवेद्यासनं ततः।
तृतीयं रत्नखचितं तत्रस्थं परमेश्वरम्॥

विभाव्यालङ्कृतं भक्त्या भोगैः स्रक्चन्दनादिभिः।
समभ्यर्च्यार्घ्यपाद्येन पादुकाभ्यामनन्तरम्॥

देयमाचमनं भूयः पादपीठं तथैव च।
समालभ्य सुगन्धे भक्तितश्चन्दनादिना॥

संवीज्य व्यजनेनैव मायूरेण ततेन च।
केशप्रसारकृत् कूर्चं पुष्पताम्बूलकर्तरीम्॥

निवेद्य देवदेवाय दुकूलवसने सिते।
उपवीतं सोत्तरीयं मकुटाद्यमनन्तरम्॥

पादनूपुरपर्यन्तमलङ्करणमुत्तमम्।
विचित्रं हि शिरोमाल्यं मुक्तपुष्पसमन्वितम्॥

स्रग्दामसूत्रसम्बद्धमाकर्णाच्चरणावधि।
रुचिरं कङ्कणं चाथ दद्यात् प्रतिसरं ततः॥

धातुभिः कुङ्कुमाद्यैर्वा विचित्रं सितसूत्रजम्।
पूरितं मृदुतूलेन ग्रथितं चान्तरान्तरा॥

अञ्जनं सशलाकं च ताम्बूलं गन्धभावितम्।
ललाटतिलकं हैमं मुखवासनरोचनम्॥

कर्णावतंसकुसुमे मण्डलं दर्पणं महत्।
प्राकारं चित्रकुसुमैर्दीप्तं रत्नप्रभोज्जवलम्॥

मृष्टधूपसमायुक्तं गुग्गुलं धूपयेच्छुभम्।
सह घण्टारवै रम्यैश्चाल्यामानेन बाहुना॥

उपानहौ सितं छत्रं शिबिकां च रथादि यत्।
वाहनं गजपर्यन्तं सपताकं खगध्वजम्॥

सितासितौ चामरौ तु मात्रा वित्तमनन्तरम्।
औपचारिकभोगानामेतेषां पूरणाय च॥

भेरीमृदङ्गशङ्खाद्यैर्जयशब्दसमन्वितैः।
गीतकैर्विविधैर्नृत्यैस्तन्त्रीवासमन्वितैः॥

(भोज्यासनम्)

स्तोत्रमन्त्रैर्नमस्कारैः प्रणामैः सप्रदक्षिणैः।
छन्नं दुकूलतूलोत्थमसूरकवरेण तु।

अथार्हणजलं स्वच्छं सुगन्धं पात्रतः कृतम्।
मधुपर्कं तर्पणजलमथ चूर्णं पुरोदितम्॥

देयं निष्पुंसनार्थं तु पुनराचमनं विभोः।
स्वलङ्कृतां सुरूपां च स्त्रग्युक्तां विनिवेद्य गाम्॥

प्रभूतमथ नैवेद्यं भक्ष्यभोज्यान्यनेकशः।
मधुराराद्या रसाः सर्वे शाकाः सफलमूलकाः॥

पानकानि पवित्राणि स्वादूनि मधुपर्कवत्।
सर्वमाचमनार्थं प्रदद्यादर्हणोदकम्॥

तिलान्यथ सुरत्नानि ताम्बूलं पुनरेव हि।
गन्धदिग्धौ करौ कृत्वा मुद्राबन्धमथाचरेत्॥

मध्यामानामिकाभ्यां तु द्वन्द्वयुक्तं करद्वयात्।
पराङ्मुखं च सुस्पष्टं कृत्वा योज्यं परस्परम्॥

आमूलान्नखपर्यन्तं नैरन्तर्येण यत्नतः।
समुत्तानं करतले शेषाच्चङ्गुलस्तथा॥

अधरोत्तरयोगेन वामदक्षिणतस्तथा।
तर्जन्यामूर्ध्वातोऽङ्गुष्ठे सम्मुखे सम्प्रसार्य च॥

निविष्टा हृदयोद्दशे कार्याऽथ जपमाचरेत्।
स्फाटिकेनाक्षसूत्रेण स्वकैर्वा करपर्वभिः॥

यथाभिमतसंख्यं च जपान्ते स्त्रग् वरैः सह।
सम्पूज्य गन्धधूपैश्च ततस्तु भगवन्मयान्॥

(वाह्निसन्तर्पणम्।)

यथाक्रमं समभ्यर्च्य प्रतिपाद्य च।
तेषा मात्रावसानं चाप्यग्नौ सन्तर्पयेत् ततः॥

प्रमाणपरिशुद्धं च विभवानुगुणं शुभम्।
चतुरावरणं कुण्डं कृत्वाङ्गुष्ठविभूषितम्॥

त्र्यंशेनार्धांशतो वापि खताद् व्यासो विधीयते।
चक्रशङ्खाम्बुजाकारं वृत्तं वा चतुरश्रकम्॥

गदाद्यैश्चक्रपर्यन्तैर्लाञ्छितैर्लाञ्छितं तु वा।
अग्निकार्योपयोगीनि तानि यानि महामते॥

स्त्रक् स्त्रुवादीनि भाण्डानि त्वङ्कितव्यानि तैरपि।
सुधाद्यैर्वर्णकैः शुद्धैर्भूषयित्वोपलिप्य च॥

सुगन्धैश्चन्दनाद्यैश्च पञ्चगव्यपुरःसरैः।

तन्मध्ये च कुशाग्रेण प्राग्भागमवलम्ब्य च॥

आरभ्य दखिणाशाया लिखेल्लेखामुदग्गताम्।
तस्यामुपरि संलिख्य लेखानां त्रितयं स्फुटम्॥

प्रागग्रं दक्षिणाशादि ह्युदीच्यन्तं च सान्तरम्।
चतुर्धा प्रणवेनाथ प्रोक्षयेदर्घ्यवारिणा॥

तदभ्यर्च्यार्घ्यपुष्पमद्यैर्ध्यायेत् तद् भद्रापीठवत्।
प्रणवैस्तु प्रतिष्ठानं प्राग्वदस्य समाचरेत्॥

चतुरश्रे स्थले कौण्डे दिग्विदिगष्टके बहिः
सम्पूर्णपात्रं कुम्भानामष्टकं विनिवेश्य च॥

ऊर्ध्वाधो मेखलानां च चतुर्णां दिक्वचतुष्टये।
कौशेयविष्टरस्थाच्च वासुदेवादिकान् यजेत्॥

विदिक्ष्वप्ययययोगेन ह्यूर्ध्वान्तमधरात् तु वै।
तद्वदेवार्घ्यापुष्पाद्यैः पूजनीयाः क्रमेण तु॥

मृदुदर्भसमूहं च नीरसं चाश्मकुट्टिमम्।
शुष्कगोमयचूर्णेन युक्तं गन्धाश्मना सह॥

कुण्डे द्रोणांशमात्रं तु समारोप्य प्रसार्य च।

ताम्रपात्रेऽथवान्यस्मिन् समादाय हुताशनम्॥
आरण्यं लौकिकं वाथ मण्जिं दर्पणोद्भवम्।
कालवैश्वानराख्यस्य हृदयेशस्य वै प्रभोः॥

मारुतानुगता भासा योज्या बाह्याग्निना सह।
भ्रामयित्वा चतुर्धा वै ततः कुण्डान्तरे क्षिपेत्॥

पूतं समिच्चतुष्कं तु प्रणवैरभिमन्त्रितम्।
दत्वा तदूर्ध्वे तदनु कुर्यात् परिसमूहनम्॥

प्रदक्षिणक्रमेणैव ह्यार्द्रपाणितलेन तु।
तिर्यक् चाधोमुखस्तेन नखपृष्ठमदर्शयन्॥

ततस्त्वभग्नमूलाग्नैः समैर्दद्यात् कुशैः स्तरम्।
दिशि दिश्युत्तराश्यान्तं याम्याशादौ तु सान्तरम्॥

चतुर्गुणैश्चतुर्धा तु अग्रच्छन्नैः परस्परम्।
प्राक्प्रान्तैः पूर्वभागाच्च यावदुत्तरगोचरम्॥

होमोपकरणं सर्वं होमभाण्डपुरस्सरम्।
अवतार्य तदूर्ध्वे तु दक्षिणस्यां तथात्मनः॥

द्वन्द्वद्वयप्रयोगेण द्रव्यस्थापनमाचरेत्।
द्विरष्टसंस्यामिध्मं तु संयुक्तं च महामते॥

द्वितीयेनाष्टसंख्येन मुक्तदर्भैस्तरण्डिकाम्।
स्रक् स्रुवौ च चतुष्कं यदेकत्र विनिवेश्य तत्॥

स्रग् धूपं मधुपर्कं च विष्टरं च घृतं चरुम्॥
आज्यास्थालीचतुष्कं च निधाय तदनन्तरम्॥

चतुष्कमेतदपरमग्रतो विनिवेश्य च।
प्रादेशमात्राः समिधाः प्रभूतं शुष्कमिन्धनम्॥

पक्ष्मकं स्वेदहृद्धस्त्रं, वामभागे निधाय च।
अर्घ्यपात्रोदकेन प्राक् कृत्स्नं पावनतां नयेत्॥

आदाय सोदकं चाथ प्रतीताख्यं च भाजनम्।
पवित्रकं तु तन्मध्ये चतुर्दर्भकृतं न्यसेत्॥

उद्धृत्योद्धधृत्य हस्तेन जलं तत्रैव निक्षिपेत्।
चातुरात्मीयं मन्त्रं च जपमानो हि साधकः॥

भूयस्तदम्भसा सर्वं प्रोक्ष्येत् विष्टरेण तु।
शेषस्यास्त्रावणं कुर्यात् सर्वदिक्षु स्तरोपरि॥

पुनरेवाम्भसाऽऽपूर्य तन्मध्ये परमेश्वरम्
ध्यात्वार्चयित्वा संस्थाप्य त्वग्रतस्तदनन्तरम्॥

सम्प्रोक्ष्यार्घ्याम्भसा चेध्मांश्चतुर्धा संविभज्य च।
पूजयेदर्घ्यपुष्पाभ्यां द्वादशाक्षरविद्यया॥

प्रणीते चापरस्मिन् वै पात्रे चाग्रे कृते सति।
सपवित्रं तु तत्रार्घ्यं दत्वा चक्रं तु विन्यसेत्॥

चतुर्मूर्तिं तदूर्ध्वे तु ध्यात्वाभ्यर्च्य यथाक्रमम्।
तत्पात्रमुत्तरस्यां च कृत्वा सम्पूज्य वै पुनः॥

आज्यस्थालीमथादाय त्वाज्यं यत्प्राग् द्रवीकृतम्।
विनिक्षिप्याज्यभाण्डान्तमुच्चस्थेन करेण तु॥

पुनरादाय कृत्वाग्र आधारोपरि यत्नतः।
दार्भं काण्डचतुष्कं तु द्वादशाङ्गुलसम्मितम्॥

तिर्यगुत्तानपाणिभ्यामवष्टभ्य च सान्तरम्।
अनामाङ्गुष्टयुग्मेन यथा मध्यं नतं भवेत्॥

तैराज्यं चतुरो वारानानयेच्चतुरुन्नयेत्।

अन्तरान्तरयोगेन ह्यात्मनोऽग्नेस्तु सम्मुखम्॥

प्रणवेनोक्तसंख्येन कुण्डमध्येऽथ निक्षिपेत्।
स्रुक् स्रुवावथ चादाय दर्भपुञ्जीलकेन तु॥

रजोपनयनं कुर्यात् प्रक्षाल्योष्णेन वारिणा।
निर्मलीकृत्य कूर्चेन ज्वालाभिः सम्प्रताप्य च॥

प्रोक्षयित्वार्घ्यतोयेन पूजयित्वा निधाय च।
बहुशाखैरभग्नाग्रैः समूलैः सुसमैः कुशैः॥

चतुर्भिर्वामहस्तेन त्वादायाथ पवित्रकम्।
दक्षिणानामिकायां तु चतुष्काण्डविनिर्मितम्॥

अङ्गुलीयकरूपं च कृत्वा वै तदनन्तरम्।
संस्कृताज्यस्य विप्रुड्भिः संस्पृशेदिन्धनादिकम्॥

(होमः।)

निः शेषदोषशान्त्यर्थमथाग्नेराहृतस्य च।
शतं शतार्धं पादं वा त्वाहुतीनां स्वशक्तितः॥

तिलानां घृतसिक्तानां शुद्धेन हविषा सह।
होतव्यं कर्मसिध्द्यर्थं यथा तदवधारय॥

आहुत्यामुद्धृतयां च मूलमन्त्रावसानतः।
प्रणवान्तं पदं ब्रूयादग्निं शोधय शोधय॥

यथावस्थितरूपेण ततस्तेनैव बुद्धिमान्।
दद्यात् पूर्णाहुतिं पश्चात् कृतेन तु चतुष्पलीम्॥

तस्य संशुद्धदोषस्य पुनरेव समाचरेत्।
सम्बोधजनकं होमं जडभावप्रशान्तिदम्॥

उच्चार्य मूलमन्त्रं तु प्रणवद्वितयान्वितम्।
जुहुयादाहुतीनां च सहस्रं शतमेव वा॥

तद्वदाज्येन सन्तर्प्य दद्यात् पूर्णाहुतिं तथा।
तदा स लब्धसत्तः स्यात् पश्यत्यन्तर्गतं विभुम्॥

प्राणभूतमजं विष्णु तन्मयत्वमथाश्रयेत्।
अथ सद्यज्ञनिष्ठस्य कर्मिणोऽस्यापवर्गिणः॥

याति यागाङ्गभावित्वं स्वयमेव तदिच्छया।
विभजत्यात्मनात्मानं चतुर्धा कुण्डमध्यतः॥

अधिभूतस्वरूपेण समाश्रित्य च दिक्क्रमम्।
पूर्वमाहवनीयाख्यस्वरूपेणाथ दक्षिणे॥

समास्ते सभ्यवपुषा पश्चिमस्यामनन्तरम्।
गार्हपत्याख्यभेदेन ततस्तिष्ठति चोत्तरे॥

ओदनम्पचनात्मा तु सर्वात्मत्वेन मध्यतः।
आधाराधेयभावेन त्वास्ते संवलिताकृतिः॥

अङ्गराण्यर्चिषश्चैव शक्तिर्या दहनात्मिका।
त्रिलक्षणोऽयमाघार अधेयो हुतभुग् विभुः॥

आत्मयोनिस्तु विश्वेशो वासुदेवः सनातनः।
एवं ज्ञात्वा पुरा सम्यक् सत्तां वैश्वानरीं पराम्॥

ततः कर्मणि वर्तेत नैष्टिकः कृतनिश्चयः।
कुर्यादुदकपूर्वं तु प्राग्वदावाहनं ततः॥

व्येक्तेर्विगलितेनैव तत्वेनाप्यव्ययात्मना।
सर्वेश्वरस्य वै यस्माद् यद्यन्मान्त्रं महद्वपुः॥

वाच्यवाचकरूपं तद् विज्ञेयममलेक्षण।

तत्पुनः शुद्धसामान्यमुपचारविधौ स्थितम्॥

यद्भोगदानमन्त्रैस्तु रहितं मान्त्रमैश्वरम्।
प्राक् चतुर्धा विभक्तो यस्तमादायेध्मसञ्चयम्॥

आज्येनोभयतः सिक्तं ब्रह्मक्षीरद्रुमोद्भवम्।
कुण्डस्य ब्रह्मभित्तिभ्यां मध्ये भागचतुष्टये॥

निदध्यादुत्तराशान्तं प्राग्भागादादितः क्रमात्।
ईशानाग्नेयपादाभ्यां पतितं प्राक् चतुष्टयम्॥

अग्नेयनैऋताशाभ्यां विश्रान्तमपरं न्यसेत्।
नैऋतानिलसंस्पर्शि तृतीयं विनिवेश्य च॥

वाय्वीशपदसंरुद्धं चतुर्थं तु चतुष्टयम्।
एवं चतुर्विभक्तेन सामिधेन समासतः॥

कुण्डमेकं चतुर्धा वै चतुर्णां संविभज्य च।
अग्नीनामेकदेहानां चातुरात्म्यव्यपेक्षया॥

यदा य उपयोग्यः स्यात् यस्मिन् यस्मिन् हि वस्तुनि।
स्वमूर्तेस्तर्पणार्थं च कर्माणि स्थापनादिके॥

तदा तदा स आदेयः स्वकात् स्थानाच्च यत्नतः।
द्वितियमिंध्ममादाय त्वष्टकाष्ठमयो हि यः॥

द्विधा कृत्वा पुराज्येन पूर्ववत् सेचयेच्च तम्।
निधाय दक्षिणस्यां च मध्य आग्नेयदिग्गतम्॥

विश्रान्तं नैऋतपदे चोत्तरस्यां तथाऽपरम्।
वाय्वीशपदसंरुद्धमाज्यमादाय वै ततः॥

चतुः संख्येन मन्त्रेण प्रणवालङ्कृतेन च।
दक्षिणे स्त्रुक् चतुष्कं तु जुहुयादुत्तरे तथा॥

सूर्यसोमात्मकं चाग्नेर्विद्धि तल्लोचनद्वयम्।
एतयोरन्तरं यद् वै तदग्नेर्वदनं स्मृतम्॥

तत्र वै जुहुयात् पूर्वं समिधां सप्तकं क्रमात्।
घृतसिक्तां चतुः संख्यामेकैकां हि सुपुष्कलाम्॥

प्राक् कुङ्कुमादिना लिप्तां काष्ठसंख्यां तु होमयेत्।
स्रग्धूपं मधुपर्कं च बीजान्नाज्यं यथाक्रमम्॥

तत्रान्नसमिदो दाने विशेषोऽयं विधीयते।
साधितं संस्कृताग्नौ प्राक् तन्निधायाग्रतश्चरुम्॥

समुद्घाट्यावलोक्यादौ सम्प्रोक्ष्यार्घ्याम्भसा ततः।
दर्भकाण्डचतुष्केण साग्निना तदनुस्पृशेत्॥

तन्मध्ये स्रुक्चतुष्कं तु मन्त्रैराज्यस्य निक्षिपेत्।
अथादाय स्रुचं तत्र तद्वद्दद्याच्चतुष्टयम्।
चतुरङ्गुलमानेनाप्यन्नग्रासमथाहरेत्।
तन्निधाय स्रचा दर्भे तदूर्ध्वं पूर्ववद् घृतम्॥

दद्यादग्नौ चतुष्कं तु क्षिपेदन्नाहुतिं ततः।
भूयोऽग्नौ स्रक्चतुष्कं तु चाज्यस्यापाद्य यत्नतः॥

ततोऽन्नमाज्यसंसिक्तं प्राग्वत् कृत्वाहुतिं पुनः।
दद्यात् पूर्वप्रयोगेण त्वेवमेव चतुष्टयम्॥

हुत्वाप्यन्नाहुतीनां च ह्याज्याख्यां जुहुयात् ततः।
तदन्ते तोयनिर्मुक्तैः कुसुमैरर्घ्यमिश्रितैः॥

पूजयेच्चतुरो वारान् मन्त्रैर्वा प्रणवैः प्रभुम्।
ततो मोक्षाप्तये होमं यथाशक्ति समाचरेत्॥

(उत्तरपूजा।)

शतपूर्वं सहस्रान्तं दद्यात् पूणाहुतिं ततः।
एकं मन्त्रचतुष्केण चतुर्भिश्चतुरोऽथवा॥

प्राग्वत् पूजां पुनः कुर्याद् दर्भैः संमार्ज्य च स्रुचम्।
यथा भवति निः स्नेहमथ प्राक्स्थापितेन तु॥

पुरतश्चाम्भसाऽऽपूर्य तां च पात्रेण तेन वा।
प्रागादौ कुण्डबाह्यो तु प्रादक्षिण्येन सेचयेत्॥

प्रवित्रकेणाथ ऊर्ध्वे विनिक्षिप्य करेण वा।
शेषं स्वशिरसो दद्यात् स्वस्थानेऽथ त्वधोमुखे॥

निदध्याद्धोमभाण्डे ते भस्मना तदनन्तरम्।
जलनिर्मथितेनैव ह्यूर्ध्वपुण्ड्रचतुष्टयम्॥

हृद्यंसयोर्ललाटे च कुर्यात् दीपशिखाकृति।
एवं परिसमाप्ते तु अग्निकार्येऽर्पिते सति॥

संविभागः पितृणां च यथा कार्यस्तथोच्यते।
कुण्डस्य योनिनिकटे दक्षिणाग्रान् स्तरेत् कुशान्॥

भद्रपीठसमीपे तु क्ष्मातले वा तदूर्ध्वतः।
स्तरोपरि वीकीर्याथ तिलान् सरजतोदकान्।

क्रमेण भावयेत्तत्र पितृनथ पितामहान्।
तृप्तये ह्यथ सर्वेषां देवाय विनिवेद्य च॥

प्रोक्षितान्यन्नपात्राणि चतवारि कबलानि वा।
स्तरोर्ध्वे तु निधायाथ सम्पूज्यार्घ्यादिना ततः॥

क्रमेण चातुरात्मीयैर्मन्त्रैरप्ययोगतः।
ततस्तु नाम्ना गोत्रेण मन्त्रपूर्व तिलोदकम्॥

सर्वेषामर्घ्यकलशात् प्रदद्याच्च यथाक्रमम्।

तादर्थ्येनाथ चतुरो विनिवेश्यासनेषु सनेषु च॥

लब्धलक्षान् परे तत्वे ब्राह्मणान् पाञ्चरात्रिकान्।
प्राङ्मुखं द्वितयं चैव द्वितयं चाप्युदङ्मुखम्॥

सम्पत्यभावेऽप्येकं वा विनिविश्योत्तराननम्।
अथ तेषां क्रमात् कुर्यादर्चनं चातुरात्म्यवत्॥

अर्घ्यानुलेपनाद्यैस्तु भोगैर्मात्रावसानिकैः।
तत्तत्कालोचितैः सर्वैरनुपादेयवर्जितैः॥

तैश्चापि मौननिष्ठैस्तु भवितव्यं सुयन्त्रितैः।
वाग्यताः शुद्धलक्षाश्चप्यन्नमूर्तौ जनार्दने॥

येऽश्नानि पितरस्तेन तृप्तिमायान्ति शाश्वतीम्।
अतः सव्यभिचारं तु मौनं जवर्यं क्रियापरैः॥

शुभमव्यभिचारं यत् तत् कार्यं सर्ववस्तुषु।
यदङ्गसङ्केतमयैरव्यक्तैर्नासिकाक्षरैः॥

कृतमोष्ठपुटैर्बद्धैर्मौनं तत्सिद्धिहानिकृत्।
स्वयमेव सुबुध्या यत् सर्ववस्तुषु वर्तते॥

शब्दैरनुपदिष्टैस्तु तन्मौनं सर्वसिद्धिदम्।
तस्माद्वै श्राद्धभोक्तृणां दिव्ये वा पितृकर्मणि॥

दद्यानैवेद्यवत् सर्वं मर्यादाभ्यन्तरेऽग्रतः।
योनाचमनपर्यन्तं कालं तिष्ठन्ति वाग्यताः॥

विधिनानेन वै नित्यं यागयज्ञे तु वैष्णवे।
संविभागः पितृणां च कार्यं सद्द्रविणैर्नरैः॥

कृत्वा तिलोदकान्तं वा फलमूलैः स्वशक्तितः।
तदर्थं ग्रासमात्रं त दद्याद् गोष्वथ भैक्षुके॥

यस्माद् दिव्यैर्महामन्त्रैर्दत्तं यत्पूजितेऽच्युते।
पित्रर्थमल्पं वा भूरि तत्तेषामक्षयं भवेत्॥

(अनुयागविधिः।)

पश्चाच्छरीरयात्रार्थमभ्यर्थ्य परमेश्वरम्।
लब्धानुज्ञस्तु वै कुर्यादात्मयागं यथाविधि॥

भोज्यं नैवेद्यपूर्वं तु सर्वमादाय पात्रगम्।
विनिवेद्य च देवाय परित्रीकृत्य चाम्भसा॥

सत्यरूपा ह्यलक्ष्या चाप्यन्नदोषक्षयङ्करी।
चेतसा चातुरात्मीया भावनीया च भावना॥

रसात्माऽध्यक्षसंज्ञोऽन्ने स्वादुभावे व्यवस्थितः।
प्रद्युम्नो भगवान् रूपे चैतद्वीर्यं तु लाङ्गलिन्॥

भोक्ता महात्मा भगवान् वासुदेवः स्वयं ह्यजः।
चतुः प्रणवसंजप्तं ततोम्भश्चुलुकं पिबेत्॥

वक्त्रकुण्डेऽथ तेनैवाप्यन्नाहुतिचतुष्टयम्।
हुत्वा चाभिमतैर्ग्रासैस्ततोऽश्नीयाद् यथारुचि॥

समाचम्य पुनर्यायात् प्रयतो भगवद्गृहम्।
मनोबुध्द्यभिमानेन सह न्यस्य धरातले॥

कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम्।
प्रदक्षिणसमेतेन त्वेवंरूपेण सर्वदा॥

अष्टाङ्गेन नमस्कृत्य ह्युपविश्याग्रतः प्रभोः।
आगमाध्ययनं कुर्यात् तद्वाक्यार्थविचारणम्॥

प्राप्ते तु सन्ध्यासमये स्नात्वा वा जघनावधि।
क्षालयित्वा ततः कुर्याद् वासः सम्परिवर्तनम्।

अर्चयित्वार्घ्यपुष्पाद्यैर्देवमग्निं यजेत् ततः।
यथाशक्तिं जपं कुर्यादासाद्य शयनं ततः॥

समाधाय बहिर्देवं निरालम्बपदे स्थितम्।
अप्रयत्नेन वै तावदनिरुद्धेन तेजसा॥

सह तेनैव वै निद्रा यावदभ्येति साम्प्रतम्।
समुत्थायार्धरात्रेऽथ जितनिद्रो जितश्रमः॥

कमण्डलुस्थितेनैव समाचम्य तु वारिणा।
गुरुं देवं नमस्कृत्य ह्युपविश्याजिनासने॥

न्यासं मन्त्रचतुष्केण कुर्यात् संहारलक्षणम्।
आपादाज्जानुपर्यन्तमनिरुद्धं च विन्यसेत्॥

प्रद्युम्नाख्यं न्यसेन्मन्त्रं नाभ्यन्तं जानुमण्डलात्।
नाभेराकर्णदेशं मन्त्रं साङ्कर्षणं न्यसेत्॥

आकर्णाद् ब्रह्मरन्ध्रान्तं चतुर्थं विनिवेद्य च।
ततस्त्वभिमतेनै वत्वास्ते पद्मासनादिना॥

स्वात्मना चातुरात्मीयमभिमानं समाश्रयेत्।
समं कायशिरोग्रीवं सन्धाय सह वक्षसा॥

दृङ्नासाग्रगता कार्या विनिमीलितलक्षणा।
जिह्वा तालुतलस्था च सान्तरे दशनावली॥

ईषदोष्ठपुटौ लग्नौ धार्ये द्वे बाहुकूर्परे।
ऊरुमध्यप्रदेशे हस्तौ नाभावधो न्यसेत्॥

अधरोत्तरयोगेन वामदक्षिणतः क्रमात्।
अचलं योगपट्टेन त्वेवं सन्धार्य विग्रहं॥

सङ्कोच्यापानदेशं त्वप्युपरिष्टात् तमेव हि।

विकास्यावर्णहीनेन हार्णेनालक्ष्यमूर्तिना॥

विषयान्तर्निविष्टं तु क्रमाच्चितं समाहरेत्।
कुर्याद् वै बुद्धिलीनं तु तां च कुर्यात् स्वगेचरे॥

समाधायात्मनात्मानं सह मन्त्रैस्ततः क्रमात्।
आ जाग्रत्पदभूमेर्वै यथा तद् गदतः श्रुणु॥

मध्याह्नभास्कराकारैः यथा तद् गदतः श्रुणु॥

मध्याह्नभास्कराकारैः सर्वैः संशन्तविग्रहैः।
स्मरेत् पूर्वेदितं पद्मं चातुरात्म्यैरधिष्ठितम्॥

ततो जाग्रत्पदस्थं चाप्यनिरुद्धं च मन्त्रराट्।
परावर्त्य शतं बुध्या तदभिन्नेन चात्मना॥

तन्मन्त्रजपसामर्थ्यात् तादात्म्यस्थितिबन्धनात्।
महिमा तु सविज्ञानस्तदीयस्तस्य जायते॥

अभ्यासाद् वत्सरान्ते तु तदद्वैतसमन्वितम्।
अथ प्रद्युम्नमन्त्रं तु परावर्त्य शतद्वयम्॥

योऽयं सोऽहमनेनैवाप्यद्वैतेन सदैव हि।
एवमेव समभ्यासाद् मतिमांश्छिन्नसंशयः॥

तत्प्रभावाच्च तेनैव तथा कालेन जायते।
अनेन क्रमयोगेन जपवृध्याऽन्वितेन तु॥

निखिलं चाप्यधीकुर्याद् मन्त्रवृन्दं पुरोदितम्।
यावदाभाति भगवान् स्थाने पूर्वोक्तलक्षणे॥

प्रत्लीनमूर्तिरमलो ह्यनन्तस्तेजसां निधिः।
चिन्दानन्दघनः शान्तो ह्यनौपम्यो ह्यनाकुलः॥

समाधायात्मनात्मानं तत्र त्यक्त्वा जपक्रियाम्।

ध्यातुध्येयविभागेन यावत् तन्मयतां व्रजेत्॥

यदा संवेद्यनिर्मुक्ते समाधौ लभते स्थितिम्।
अभ्यासाद् भगवद्योगी ब्रह्म सम्पद्यते तदा॥

ततः श्रमजयं कुर्यात् त्यक्त्वा ध्यानासने क्रमात्।
समाप्ते शयनस्थश्च कालं रात्रिक्षयावधि॥

ब्राह्मे मुहूर्ते सम्प्राप्ते ह्युत्थाय शयनात् ततः।
स्नात्वाऽभ्यर्च्य जगन्नाथं समिद्दानं समाचरेत्॥

जुहुयाच्च यथाशक्ति ततस्तिलघृतादि यत्।
ऊनातिरिक्तशान्त्यर्थं सर्वकर्मसमाप्तये॥

दद्यात् पूर्णाहुतिं कृत्वा पूर्ववत् सेचनादिकम्।
ततो देवं तु पीठस्थं कुण्डस्थमनलं ततः।

न्यासद्वयं च संहृत्य मनसा च स्वविग्रहात्।
निः शेषस्योपसंहारं कुर्यादर्घ्यादिकस्य च॥

यागोद्देशात्तथा कुण्डात् स्तराद्यस्याखिलस्य च।
सहोपलेपनेनैव सर्वमम्भसि निक्षिपेत्॥

सकृत् त्र्यहं च सप्ताहं पक्षं मासमथापि वा।
यो यजेद् विधिनाऽनेन भक्तिश्रद्धासमन्वितः॥

सोऽपि ययात् परं स्थानं किं पुनर्योऽत्रसंस्थितः।
यावज्जीवावधिं कालं बद्धकक्ष्यो महामतिः॥

इत्युक्तं चातुरात्मीयं समासादमलेक्षण।
सबाह्याभ्यन्तरं सम्यऽयङ्मया ते यजनं शुभम्॥

यज्ज्ञात्वा क्षयमायति त्वविद्याबीजमक्षयम्।
अचिरादेव भविनां भक्ताना भवितात्मनाम्॥

(This text has been printed with the commentary of Alasinga-bhaṭṭa by Sampurnananda Sanskrit University, Vāranāsi, 1982. The above excerpt is from the sixth chapter of the text; the topical divisions of the text is mine)

Chapter V

NITYĀRCANĀ OF DEVI

EXCERPTS FROM PARAMĀNANDA-TANTRA

I. PREPARATIONS

साधकः प्रातरुत्थाय ब्रह्मरन्ध्रे निजं गुरुम्।
पूर्वोक्ताकुलपद्मान्तर्द्वाशान्तसरोरुहे॥

विधुमण्डलमध्यस्थं मातृश्रृङ्गाटमध्यगम्।
श्वेताम्बरं श्वेतवर्णं मुक्तामयविभूषणम्॥

त्रिनेत्रं रक्तशक्त्यङ्कमन्दस्मितलसन्मुखम्।
वराभयलसत्पुरस्तचिन्मुद्राविलसत्करम्॥

एवं ध्यात्वा परां बालां हृदि ध्यातवा च पूजयेत्।
तस्या अङ्गप्रभापूरमज्जनोत्क्षिप्तकल्मषः॥

स्वात्मरूपां च तां ध्यात्वा निरालम्बो भवेत् क्षणम्।
कृतशौचादिकृत्यः सन् स्नानं कुर्याद्यथाविधि॥

नद्यादौ तु शुभे तीर्थे त्रिकोणं स्वाभिमुख्यतः।
तत्र बीजत्रयं कोणे मध्ये मायां विलिख्य च॥

आवाह्य हृदयाद् बालां देवता तीर्थमेव च।
संपूज्य मनुना तत्त्वमुद्रया प्रोक्ष्य मस्तके॥

ततः शिरोहृद् भुजेषु कुम्भमुद्राभिषेचनम्।

जपन् तत्र निमग्नस्तां तीर्थरूपां विभावयेत्॥

पुनस्त्रिवगाह्याथ धृतवस्त्रत्रिपुण्ड्रकः।
सन्ध्यां कुर्याच्च तत्क्रमं श्रुणु साम्प्रतम्॥

दक्षानामाङ्गुष्ठयोगे तत्त्वमुद्रा तु तर्पणे।
कुम्भाकृतिच्चाग्रयोगाद् मुद्रेऽयं कुम्भसंज्ञिता।
बीजत्रययुतं तत्त्वत्रयं व्यष्टिसमष्टितः॥

स्वाहान्तं च चर्तुर्धैवमात्मविद्याशिवात्मकम्।
आचम्यैवं कुम्भकं तु विद्यात्रययुतं चरेत्॥

एतद्द्वयं तु सर्वत्र कर्मादौ तु भवेच्छिवे।
संकल्प्य न्यस्तसर्वाङ्गस्तोये चक्रं समावहेत्॥

वामहस्तेन चाच्छाद्य दक्षहस्तगतं जपेत्।
भूतबीजं मूलविद्यां मालिनीं सप्तमन्त्रितम्॥

वामहस्तगतं पश्चाच्छाखारन्ध्रविनिर्गतम्।
तर्पयेन्मूर्ध्नि हृदये तेजोरूपं विचिन्त्य तत्॥

अकुलामृतसंयुक्तं पापक्षालनपूर्वकम्
नासिकानिर्गतं दक्षकरस्थं वाममार्गतः॥

प्रजपन् पाशुपताख्यामस्त्रविद्यां महेश्वरि।
वज्ररूपशिलायां तदास्फाल्य क्षालयेत् करौ॥

आचम्य मूलगायत्र्या त्रिरर्घ्यं परिकल्पयेत्।
रूपं रसः स्पर्शशब्दौ तेजः स्याद् भूतपञ्चकम्॥

अमृतेति समुच्चार्य्य मालिनीवह्निवल्लभा।
अष्टाक्षरी समुद्दिष्ठा विद्या चामृतमालिनी॥

तारान्ते पशुबीजं च पशुवर्मास्त्रयोगतः।

षडक्षरः पाशुपतास्त्राक्ष्यो देवि समीरितः॥

पशुबीजं गन्धरूपचतुष्टयो बिन्दुना युता।
वागीश्वरीति संलिख्य विद्महे च ततो लिखेत्॥

कामेश्वरी धीमहि च तन्नः शक्ति प्रचोदयात्।
बीजत्रयं त्रिखण्डादौ पञ्चविंशापूर्णरूपिणी॥

गायत्रीयं समुद्दिटा चार्घ्यदाने नियोजिता।
अग्निस्पर्शौ प्रतिष्ठास्थौ बिन्दुना च सुशोभितम्॥

माया हंसश्च सूर्यस्य मन्त्रो वेदाक्षरो मतः।
बाला श्रीपादुकायै च एषोऽर्घ्यो वह्निवल्लभ॥

पादुकां तर्पयामीति तर्पणेऽर्घ्ये समुच्चरेत्।
प्रकाशशक्तिसहितमार्तण्डाद् भैरवाय च॥

सूर्यस्यार्घ्यप्रदानादौ चैवं सर्वत्र योजयेत्।
एवं सन्ध्यां विधायाथ पूजामन्दिम्माविशेत्॥

द्वारं संपूज्य पश्चाद् वै भूमिं प्रार्थ्याऽसने स्थितः।
भूतशुद्धिं तथा प्राणप्रतिष्ठामाचरेद् हृदि॥

अन्तर्बहिर्मातृकां च न्यस्य देहे समाहितः।
विशेषन्यासयोगने देहं मन्त्रमयं स्मरेत्॥

II. DVĀRA-PŪJĀ

श्रुणु देवेशि वक्ष्यामि द्वारपूजादिकं स्फुटम्।
पूजागृहस्य द्वारेषु पूर्वादिक्रमयोगतः॥

द्वाराद् बहिः पुरोभागे द्वाराभिमुखतः स्थितः।
गन्धोदकेन पुरतो मण्डलं मत्स्यमुद्रया॥

वृत्तं च चतुरस्त्रं च तत्र पुष्पाक्षतैर्यजेत्।
अखण्डमण्डलाकारं विश्वं व्याप्य व्यवस्थितम्॥

त्रैलोक्यं मण्डितं येन मण्डलं तत्सदाशिवम्।
मण्डलेशं समावाहा चैवं गन्धादिभिर्यजेत्॥

अथास्त्रेण क्षालितं वै साधारं ताम्रपात्रकम्।
ह्रीं ह्रीं मन्त्रेण संपूर्य तीर्थराजं समावहेत्॥

ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे।
तेन सत्येन मे देव तीर्थं देहि दिवाकर॥

सूर्यबिम्बात् समाकृष्य चैवमङ्कुशमुद्रया।
निपात्य तस्मिन्नुदके पूज्य गन्धादिभिस्ततः॥

त्रिधा मूलेनाभिमन्त्र्य चामृतीकृत्य धेनुना।
निर्विषीकृत्य तार्क्ष्येण संरक्ष्यास्त्रेण वर्मणा॥

अवगुण्ठ्य ततः पुष्पेणोद्धतैस्तोयबिन्दुभिः।
अस्त्रेण द्वारमभ्युक्ष्य रविवारं ततो यजेत्॥

सव्यवामकराभ्यां तु पूजयेत् तर्पयेत् सकृत्।
पूजातर्पणमुद्राभ्यां पुष्पैः पुष्पतोदकैः॥

अविघ्नमूर्ध्वदेहल्यां महालक्ष्मीं सरस्वतीम्।
दक्षवामक्रमात् पार्श्वे गणेशं क्षेत्रनायकम्॥

गङ्ग च यमुनां धात्रीं विधात्रीं शङ्खपद्मतः।
निधिमित्यष्टधा चाधो देहल्यामस्त्रदेवताम्॥

प्रतिद्वारे द्वारं देवि ब्राह्मीं माहेश्वरी तथा।
कौमारीं वैष्णवीं चैव वाराहीं च क्रमात् ततः॥

माहेन्द्री चैव चामुण्डां महालक्ष्मीं समर्चयेत्।

प्रत्येकं च चदुर्द्वारे चैकस्मिन्नपि वा यजेत्।
पूजास्थानात् पश्चिमतोऽथवा द्वारं विचिन्तयेत्॥

III. ĀSANA: BHŪTA-ŚUDHI

द्वारपूजां विधायैव प्रविशेच्छ्वासमार्गतः॥

वामं संकोचयन्नङ्ग तत्र संप्रार्थयेद् भुवम्।
भूमि त्वया धृता लोका देवि त्वं विष्णुना घृता॥

त्वं च धारय मां देविं पवित्रं कुरु चासनम्।
संप्रार्थ्यैवं चाक्षताद्यैस्ततो भूमिं प्रपूजयेत्॥

भूमौ हृदयमालिख्य सबिन्द्वाद्यं पुरः, स्थितम्।
एवं पूज्याग्रतस्तत्र स्थाप्रयेदासनोत्तमम्॥

आसनस्य तु मन्त्रेण पूजयेदासनं शिवे।
मायामाधारशक्तीति विलिक्ष्य कमलासन॥

यकारद् हृदयं चेति मन्त्रस्त्वासनपूजने।
पूज्यं चैवमासनस्थो दक्षवामांसयोर्हृदि॥

गुरून् गणपतिं स्वाद्यबिन्दुयुक्परदेवताम्।
हृदन्तेन नमस्कृत्य पार्ष्णिघातत्रयेण वै॥

आसनाधाः फडित्येवं तालविध्नान्निवारयेत्।
सुदर्शनास्त्रमन्त्रेण रुद्रार्णेन महेश्वरि॥

अस्त्रन्यासेन भूविघ्नान् दिग्बन्धात् खेचरानपि।
वह्निप्रकारमभितो विभाव्याथात्मशोधनम्॥

हंसेन कुम्भकं कुर्वन् मूलाधारस्थितां पराम्।
कुण्डलीं धातुनाथाभिर्गणनाथादिभिस्तथा॥

देहस्थाखिलदेवाद्यैर्ब्रह्मरन्ध्रोपरि स्थिते।
संयोज्य परतत्त्वे तु स्थूलदेहं विचिन्तयेत्॥

तत्त्वाधिष्ठातृदेवानां लयादात्मनि तज्जडम्।
विभाव्य वामकुक्षौ तु चिन्तयेत् पापपूरुषम्॥

अधोमुखं कृष्णावर्णं रक्तश्मश्रुशिरोरुहम्।
खड्गचर्मधरं क्रूरं महापापोपपातकैः॥

उत्पन्नाङ्ग तेन सह स्थूलदेहं तु साधकः।
शब्दस्पर्शरसैर्बीजैः पूरकुम्भकरेचकम्॥

कुर्वन् वाय्वग्निसलिलैः शोष्य दग्ध्वा निषिच्य च।
पुना रूपाग्नि सोऽहं च पूरकुम्भकरेचकम्॥

घनीकृत्य तु संचेत्य चानये हृयदे पुरुषम्।
उत्पाद्य तस्मादखिलां तत्वदेवमयीं तनुम्॥

कुण्डल्याद्या देवताश्च स्वस्वस्थाने विचिन्तिता।
देवदाप्रचुरं देहं गतदोषं विचिन्तयेत्॥

IV. PRĀṆA-PRATISHṬHĀ

भूतशुद्धिं विधायैवं प्रांणस्थापनमाचरेत्।
पाशं मायामङ्कुशञ्च शब्दाद् वाय्वन्तसप्तकम्॥

अग्निः प्रीतिगतः प्रीतिः पृथ्वी वायुस्तथा जपाः।
माया प्रीतिः सप्तदश सर्वे बिन्दुयुताः प्रिये॥

तत्तन्नाम विलिख्याथ प्राणा इह तथा पुनः।
प्राणास्ततः सप्तदश नाम जीव इह स्थितः॥

पुनः सप्तदशाख्या च सर्वं लिख्येन्द्रियाणि च।

इह स्थितानि तान्येव नाम वाङ्मन आलिखेत्॥

श्रात्रत्वक्चक्षुरथ वै जिह्वाघ्राणं च पाद वै।
प्राणा इहागत्य सुखं चिरं तिष्ठन्तु वै शिरः॥

षट्कं चानत्यागतं चेति प्राणस्य स्थापने मनुः।
एकोनत्रिंशदधिकशतवर्णों भवेत् प्रिये॥

पाशबीजं बिन्दुयुता प्रतिष्ठा संप्रकीर्तितम्।
वह्निस्पर्शौं तुष्टिगतौ माया बिन्दुयुता भवेत्॥

शक्तिस्पर्शौं प्रतिगतौ चाङ्कुशं बिन्दुयोगतः।
अग्निः सबिन्दु सर्गेण युतो वायुरथो जया॥

ब्रह्मादयो वै ऋषयश्छन्दो वेदत्रयं भवेत्।
प्राणशक्तिः परादेवी देवता संप्रकीर्तिता॥

तेजस्पर्शयुतैर्दीर्घबीजैरङ्गानि विन्यसेत्।
षण्डस्वरविहीनैस्तु जातास्ते प्रकीर्तिताः॥

शोणसागरमध्यस्थरत्नमाणिक्यपोतके।
मणिमण्डपसंराजद्रक्तपद्मोपरि स्थिताम्॥

जपाकुसुमसच्छायां रक्तस्त्रग्वस्त्रभूषणाम्।
स्मरेत् त्रिनेत्रां स्वसमशक्त्यष्टकसेविताम्॥

एवं ध्यात्वा स्वहृदये तलं न्यस्य त्रिधा जपेत्।
ममेति नाम्नि संयोज्य चैवं प्राणस्थितिर्भवेत्॥

मातृकाभिस्ततः प्राणायामत्रितयमाचरेत्।
नृपेण भूतपक्षाभ्यां दिशा स्यात् पूरकादिकम्॥

ब्रह्मा ऋषिः स्याच्छन्दस्तु गायत्री कीर्तिता भवेत्।
जातिह्रस्वगुरुभ्यां तु षड्वगैः पुटितैर्न्यसेत्॥

ब्रह्मरन्ध्रे स्मरेत् पद्ममष्टपत्रं सुकर्णिम्।
भूपुरं तद्बहिर्देवि सर्गयुक्प्रकृतिं स्मरेत्॥

कोणेषु रसबीजं वै दिक्षु पत्रेषूष्टवर्गकम्।
पञ्च पञ्च चतुर्युग्मद्वितयं चेति कादितः॥

स्वरयुग्मं केशरेषु प्रासादपरकर्णिकम्।
अग्निवाय्वङ्गदासर्गः प्रासादपरसंज्ञितम्॥

आधारध्वनिमालक्ष्य कुलपद्मनिवासिनीम्।
सार्धत्रिवलयोपेतसुप्तसर्पनिभाकृतिम्॥

तडित्कोटिप्रतीकाशां बिसतन्तुतनीयसीम्।
कालाग्निसदृशाभासां स्मरन् प्राणबलोद्यमाम्॥

V. NYĀSA

कुम्भकश्वाससम्पर्कप्रबुद्धां ब्रह्मवर्त्मना।
तन्वालास्पर्शविगलत्परचन्द्रामृतोद्भवाः॥

सबिन्दवो मातृकार्णा ध्यात्वैवं विन्यसेदथ।
विशुद्धौ षोडशदले स्वरान् कादीननाहते॥

रविपत्रेऽथ दिक्पत्रे मणिपूरे तु डादिकान्।
स्वाधिष्ठानेऽथ षट्पत्रे बाद्यान् वादींश्चतुर्दलो॥

आधारे हक्षकारौ च आज्ञायां द्विदलेऽम्बुजे।
चतुस्तारादिकान् देव हृदन्तान् विन्यसेत् क्रमात्॥

प्रणवो वाग्भवं माया लक्ष्मीस्तारचतुष्टयम्।
एतत्सर्वत्रकर्मादौ मन्त्रादौ विनियोजयेत्॥

मन्त्राणां वीर्यसिद्ध्यर्थं तेषां तेजोमयत्वतः।

आद्यहीनं त्रितारं वै द्वितारं चान्त्ययुग्मकम्॥

गन्धस्पर्शयुता शान्तिर्लक्ष्मीबिन्दुयुता भवेत्।
एवमन्तर्मातृकाया न्यासं कृत्वा बहिर्न्यसेत्॥

तत्र स्थूलं मातृकाया ध्यानं श्रृणु समाहिता।
अकचाद्यष्टवर्गाङ्गा शुद्धस्फटिकसन्निभाम्॥

चन्द्रचूडां त्रिनयनां पद्मस्थामुन्नतस्तनीम्।
वरदं पुस्तकं चैव सुधाकुम्भं जपस्त्रजम्॥

अशेषविद्यारूपां वै हृदि ध्यात्वा प्रविन्यसेत्।
मस्तके मुखवृत्ते च नेत्रयोः श्रोत्रयोर्नसोः॥

गण्डौष्ठदन्तयुगले जिह्वायां ब्रह्मरन्धके।
पाणिद्वये मूलमध्यमणिबन्धेषु वै क्रमात्॥

शाखामूले तदग्रे च तद्वत् पदयुगे न्यसेत्।
पार्श्वद्वये पृष्ठनाभिजठरेषु तथा हृदि॥

स्कन्धयोर्गलपृष्ठे च हृदयात् पाणिपादयोः।
नाभौ मूर्ध्नि च देवेशि क्रमादादींस्तु विन्यसेत्॥

प्रसादपरयोर्मध्यगतः सेन्द्वखिलाक्षराः।
मातृकाया मनुरयं स्यात् त्रिपञ्चाशदक्षरः॥

सर्वमन्त्रमयश्चायमेन तु महेश्वरि।
बिलादिषादमूलान्तं व्यापकत्रितयं चरेत्॥

तलाभ्यां निखिलाङ्गस्य स्पर्शनं व्यापकं भवेत्।
विद्यान्यासमयो वक्ष्ये अन्तर्बाह्यविभेदतः॥

आधारानाहताज्ञासु रोधशवत्युन्मनासु च।
अथ बाह्ये पादबाहुशिखासु क्रमशो न्यसेत्॥

VI. NAVAYONI-NYĀSA

नवयोनिमथो वक्ष्ये न्यासानामुत्तमम्।
कर्णयोश्चिबुके देवि जङ्घयोर्मुखमण्डले॥

नेत्रयोर्नासिकायां च बाहुयुग्मे च वक्षसि।
कूर्परद्वितये कुक्षौ जान्वोर्नाभौ वरानने॥

पादयुग्मे तथोपस्थे पार्श्वयोर्हृदये तथा।
स्तनद्वये कण्ठदेशे न्यसेद् बीजत्रयं पृथक्॥

VII. PAÑCA-BĀṆA-NYĀSA

पञ्चबाणांश्च कामांश्च न्यसेदङ्गुलिषु क्रमात्।
षडङ्गच ततः कृत्वा व्यापकत्रितयं चरेत्॥

चक्षुस्पर्शो प्रतिष्ठास्थौ तौ पुनः शान्तिसंस्थितौ।
कामराजं पादरूपे वामश्रोत्रगते मारुते॥

सर्वत्र बिन्दुयोगः स्यात् सर्गस्त्वन्त्ये प्रकीर्तितः।
पञ्च बाणाः समाख्यातास्तेषां नाम श्रुणु प्रिये॥

क्षोभणो द्रावणो देवि तथाकर्षणवश्यकौ।
उन्माद इति विख्याता मायामूलद्वितीयकम्॥

वाग्भवं तुर्यबाणश्च मरुच्छोत्रमरूगुणाः।
बिन्द्वाद्यवामनेत्रस्थाः पञ्च कामाः प्रकीर्तिताः॥

कामो मन्मथकन्दर्पौ मकरध्वज एव च।
मीनकेतन इत्येवं नाम प्रकीर्तितम्॥

VIII. MUDRĀ-SVARŪPA

अथ पूर्वोक्तमुद्राणां स्वरूपं क्रमतः श्रुणु।

दक्षपाणितलं देवि वामपृष्ठोपरि न्यसेत्।।
अङ्गष्ठद्वितयं पाश्वे ऋजु रूपमाधोमुखम्।
मत्स्यमुद्रेयमाख्याता मण्डलादिप्रकल्पने।।

ऊर्ध्वमुष्टौ दक्षहस्ते तर्जनी वक्ररूपिणी।
मद्रेयमङ्कुशाख्या स्यात्तीर्थाह्वानादिकर्मणि।।

तर्जन्यादिचतुष्कं वै प्रोतं हस्तद्वयस्थितम्।
दक्षतर्जन्यनामायां वाममध्यकनिष्ठिके।।

वामतर्जन्यनामायां दक्षमध्य कनिष्ठके।
आधोमुखी धेनुमद्रा त्वमृतीकरणे मता।।

ऊर्ध्वतो दक्षपृष्ठं तु वामपृष्ठे नियोजयेत्।
तर्जन्यौ च कन्ष्ठि च विष्टिते तु परस्परम्।।

मध्यमानामिके वक्रे चाङ्गुष्ठे चोर्ध्वयोजिते।
तार्क्ष्यमुद्रेयमाख्याता निर्विषीकरणे शिवे।।

अस्त्रं पूर्ववदेवेह रक्षणे संप्रकीर्तितम्।
हस्तद्वयं मुष्टिरूपं ऋजुरूपता तु तर्जनी।।

भ्रामयेद् दक्षवामाभ्यां मुद्रेयमवगुण्ठिनी।

IX BĀLĀ-YANTRODDHĀRA

स्वेष्टवृत्ते ब्रह्मसूत्रमष्टादशविभाजितम्।
मध्यस्थवेदभागस्य प्राक्यप्रत्यक्तिर्यगायते।।

वृत्तसृष्टे विधाय द्वे रेखे तत्प्रान्तभागतः।
पूर्वरेखाविभेदेन प्रत्यग् सूत्राग्रयोगतः।।

प्रत्यगेखाविभेदेन प्रत्यग्सूत्राग्रयोगतः।
षट्कोणमेवं संलिख्य डमरुद्वयशोभितम्।।

प्राग्रेखासंधिभेदेन प्रत्यङ्मध्यमुखं परम्।
एवं नवत्रिकोणं तु वृत्ते चाष्टदलं लिखेत्॥

वृत्तार्धमाने तद्बाह्यो पुनर्वृत्तं समालिखेत्।
तद्बाह्ये तु चतुर्द्वारं भूपुरं विलिखेच्छिवे॥

प्रासादं मध्ययौनौ तु कामान् तद्बाह्ययोनिषु।
केसरेषु स्वरद्वन्द्वं वसुपत्रेष्टवर्गकान्॥

पत्राग्रेषु त्रिशूलानि मातृकावेष्टनं बहिः।
दलसंधिषु देवेशि केसराणि प्रकल्पयेत्॥

कचटास्तपया वर्गा शलौ चेत्यष्टसंख्यकाः।
इति यन्त्रं महादिव्यं बालासान्निध्यकारकम्॥

X. PŪJĀ

अत्र सा पूजिता देवी सुपीता वरदा भवेत्।
नवरत्नैर्निमितं तु वाञ्छितार्थफलप्रदम्॥

स्फटिकं मुक्तिदं तद्वद् गण्डकीदृषदुद्भवम्।
साम्राज्यदं सुवर्णोत्थं भयघ्नं स्यात् त्रिलोहजम्॥

राजतं शान्तिंद प्रोक्तं ताम्रोत्थं दुःखनाशनम्।
पाषाणजं रोगहरं भूर्जपत्रे शुचिप्रदम्॥

पट्टवस्त्रे रिपुहरं भूमौ पुण्यफलप्रदम्।
एकादशविधं चैतत्पूर्वं लक्षगुणं भवेत्॥

सुवर्णाद्युद्भवे पीठे पुण्यवृक्षोद्भवेऽथवा।
वस्त्रे वा स्थापयेद्यन्त्रं मृदुतूलादिसंभवे॥

पाषाणे मृण्मये देवि नैव संस्थापयेत् क्वचित्।
नाभेर्नीचं तथा कण्ठादुच्चं पीठं न कारयेत्॥

तत्र पीठे पीठपूजां कुर्याद् भक्तिसमन्वितः।
पूज्यपृष्ठे पूर्वदिक् स्यादत्तदग्रे पश्चिमा हि दिक्॥

इति ज्ञात्वैव सर्वत्र पूजयेत् त्रिपुराम्बिकाम्।
मण्डूकमादौ संपूज्य उपर्युपरि वै क्रमात्॥

कालाग्निरुद्रं मूलाद्यां प्रकृतिं च ततः परम्।
आधारशक्तिं कूर्मं चाप्यनन्तं वराहकम्॥

पृथिवीं तस्य दंष्ट्रागे तच्चतुर्दिक्षु वै ततः।
पश्चिमादिक्रमाद्दिक्षु मदिराघृतदुग्धकान्॥

समुद्रांस्तस्य मध्ये तु नवखण्डविराजितम्।
रत्नदीपं मातृकाद्यं पूर्वाद्यष्टसु वामतः॥

पुष्यरागं तथा नीलं वैडूर्यं विद्रुमं ततः।
मौक्तिकं गौमेदपद्मरागौ वज्रं च मध्यतः॥

भवेन्मरकतं ह्योते रत्नान्ता नववर्गगाः।
अलृकाश्चटताः पश्च यषौ वर्गाः समीरिताः॥

सुवर्णपर्वतं तस्मिन् नन्दनोद्यानेव च।
कल्पद्रुवाटिकां तत्र वसन्ताद्यानृतून् क्रमात्॥

इन्द्रियाश्वान् पश्चिमायां प्रच्यामर्थगजास्तथा।
विचित्ररत्नभूमिं च तत्र पूर्वादिवामतः॥

मध्यान्तनवखण्डेषु कालं मुद्रां च मातरम्।
देशं रत्नं गुरुं तत्त्वं ग्रहं मूर्तिं च वै क्रमात्॥

एतत्तु नवकं देवि चक्रेश्वर्यन्तकं भवेत्।
करुणातोयपरिखं स्वर्णप्राकारकं तथा॥

मणिमण्डपकं मध्ये तन्नैऋत्यादिकोणके।
कालं देशं तथाकारं शद्वं चेति तु रूपिणी॥

शक्त्यन्तांस्तु तथा मध्ये संगीताद्यां च योगिनीम्।
तन्मध्ये मणिवेदिं च तत्पृष्टे श्वेतछत्रकम्॥

रत्नसिंहासनं तस्यां वायव्यादिपदेषु वै।
ब्रह्मविष्णु तथा रुद्रमीश्वरं तस्य चोपरि॥

सदाशिवमहाप्रेतफलकं वायुकोणतः।
धर्मं ज्ञानं च वैराग्यमैश्वर्यं पश्चिमादितः॥

अधर्मादिचतुष्कं च मध्ये चोर्ध्वोर्ध्वतः क्रमात्।
मायां विद्यां तथानन्तं तिथिसंख्यफणायुतम्॥

मध्यमे चार्कपत्राढ्यं पद्मं ध्यात्वाऽथ पूजयेत्।
पद्मं चानन्दकन्दं च संविन्नालमतः परम्॥

प्रकृतिमयपत्राणि विकारमयकेसरान्।
मातृकातत्त्वविलसत्कर्णिकांस्तत्र पूजयेत्॥

अर्कं सोमं तथा वह्निं प्रणवाद्यं तु मण्डलम्।
सत्वं रजस्तमश्चैव बोधप्रकृतिमोहजान्॥

आत्मानमन्तरात्मानं परमात्मानमेव च।
ज्ञानात्मानं चादिमायां तच्चतुर्दिक्षु मध्यतः॥

ज्ञानं मायां कलां विद्यां परं तत्त्वात्ममन्ततः।
प्रागादिदलमारभ्य पीठशक्तीश्च पूजयेत्॥

वामां ज्येष्ठां च रौद्रीं चाम्बिकेच्छे ज्ञानरूपिणीम्।
क्रियां च कुब्जिकां बिम्बीं विषघ्नीं दूतरीं तथा॥

सर्वानन्दां क्रमाद्देवि च्छत्रचामरवीटिकाः।
पुष्पमालां भूषणाद्यपेटीं व्यजनकं पुनः॥

व्यजनं गन्धचषकं कङ्कतीं कज्जलोज्जवलाम्।
शलाकां च करण्डं च कर्पूराद्यं च चामरम्॥

दधानाः क्रमशः पीठदेव्यः पूज्यास्तथाक्षतैः।
तत्र ध्यात्वा मूलदेवीं भक्तिभावेन चावहेत्॥

उपचारैः समभ्यर्च्य विशेषार्घ्यामृतैर्यजेत्।
वामदक्षकराभ्यां च तर्पयेत् पूजयेत् क्रमात्॥

तत्तन्मुद्राविधानेन द्वितीयोद्धृतबिन्दुभिः।
पुष्पाक्षतैस्ततो देवीं त्रिवारं तर्पयेद् यजेत्॥

अनामाङ्गुष्ठयोगेन तर्जन्यङ्गुष्ठयेगतः।
तर्पणं पूजनं वामदक्षाभ्यां युगपद्भवेत्॥

मध्यबीजे मूलदेवीं मूलेन तु त्रिधा यजेत्।
श्रीपादुकां पूजयामि तर्पयामि नमो वेदत्॥

चतुर्दशाक्षरी विद्या तर्पणे पूजने मता।
चतुस्तारं ततो नाम चाग्रे चतुर्दशाक्षरी॥

मूलंदेवीं पृष्ठतस्तु गुर्वादित्रिगुरून् यजेत्।

दक्षाद्युत्तरता रेखां ध्यात्वा तन्मन्त्रकैः शिवे॥

अङ्गदेवीमूलदेव्या अग्नीशासुरवायुषु।
पुरतश्च चतुर्दिक्षु विशेषार्घ्येण तर्पयेत्॥

षडङ्गन्यासमन्तरेण हृदयदेवीति नामतः।
त्रिकोणेष्वग्रतो वांमाद् गतिप्रीतिमनोभवान्॥

पञ्चबाणांश्च कामं च द्वयं द्वयमथैककम्।
उदग्दक्षाग्रभागेषु बाह्ये कोणाष्टके ततः॥

अनङ्गानङ्गकुसुमे तथैवानङ्गमेखलाम्।
अनङ्गमदनां पश्चात् सुभगां च महाभगाम्॥

भगाद्ये सर्पिणीमाले चाग्नकोणादिवामतः।
तद्बाह्ये चाष्टपत्रेषु मिथुनाष्टकमर्चयेत्॥

असिताङ्ग तथा ब्राह्मीं रुरुं माहेश्वरीं तथा।
चण्डं कौमारिकां चैव क्रोधं चैव तु वैष्णवीम्॥

उन्मत्तं चापि वाराहीं माहेन्द्रीं च कपालिनम्।
भीषणं चैव चामुण्डां संहारमथ शङ्करीम्॥

महालक्ष्मीं पुरोभागात् प्रादक्षिण्येन वै यजेत्।
दलाग्रेषु क्रमात्कामरूपं च मलयं ततः॥

कोल्लगिरिं कुलान्तं चौहारं जालन्धरं ततः।
ओड्याणं देवकूटं च पीठानामष्टकं यजेत्॥

तद्बाह्ये मातृकावृत्ते दश विश्वग्रतः क्रमात्।
हेतुकं वेतालमथो त्रिपुरान्तकमेव च॥

अग्निजिह्वं महाकालं कपाल्येकपदौ ततः।
भीमरूपा च लौहाटकेशं दश तु भैरवान्॥

चतुस्त्रे प्राग्दिगादि दशदिक्पालकान् यजेत्।
इन्द्राग्नियमरक्षांसि पाशिमारुतयक्षपान्॥

ईशब्रह्मानन्तकांश्च तद्बाह्ये तु पुनर्यजेत्।
वटुकं योगिनीं क्षेत्रपालं गणपतिं वसून्॥

रुद्रानथ तथादित्यानश्विनौ पश्चिमादिषु।
वायव्यादिषु कोणेषु ततः पूजां समाचरेत्॥

इयं सृष्टिक्रमात् पूजा मध्याद्बाह्यान्तरीरितः।
बाह्यादिमध्यपर्यन्तं संहाराख्या प्रकीर्तिता॥

सृष्टिं कामनया कुर्यात्संह्यतिं मोक्षवाञ्छया।
सृष्टिभोदमयी देवि संह्यतिस्त्वैक्यरूपिणी॥

भेदस्य दुः खमूलत्वान्निग्रहादौ तु सा भवेत्।
मूलदेव्यास्त्वावृतीनां रश्मिभूतास्तु देवताः॥

तासां भेदव्यवस्थानाद्विकुर्वन्ति पदे पदे।
संह्यत्याभेदभावेन परानन्दमयास्तु ताः॥

सदानन्तसुखायैव साधकस्य भवन्ति वै।
चक्रोत्पत्तिं नासनां च वक्ष्ये श्रुणु समाहिता॥

शिवो हकारः शक्तिर्वै सकारः परिकीर्तितः।
स्वरस्त्वनुग्रहात्मा स्यात् सर्गः सृष्ट्यभिधो भवेत्॥

तस्मादनुग्रहपरः शिवः शक्त्या जगत्सृजन्।
वर्तते सर्वमध्यस्थो मध्यबीजस्थरूपतः॥

तस्य नैसर्गिकी शक्तिर्यदा जाता त्रिधा शिवे।
इच्छा ज्ञानं क्रिया चेति गुणत्रयमयी क्रमात्॥

अहङ्कारात्मिका बिन्दुत्रयो कोणत्रिरूपिणी।
तस्य सृष्ट्युन्मुखत्वेन कामनावीचिसंभवम्॥

धर्मादिशक्त्यष्टकं तु कोणाष्टकतया स्थितम्।
धर्मो ज्ञानं च वैराग्यमैश्वर्यं च चतुष्टयम्॥

अकादिदक्षभागान्तं पुष्ठभागाच्च वामतः॥
अधर्मादिचतुष्कं वै तासां पल्लवरूपतः॥

अलुप्तता बुद्धता च तृप्तता च स्वतन्त्रता।
लुप्तता चाऽबुद्धता चातृप्तता परतन्त्रता॥

इत्यष्टकं चाष्टदलं मोहकत्वाच्छलात्मकम्।
बन्धकत्वाद्वृत्तयुग्मबन्धितं जातमम्बिके॥

मायाशक्तिर्बहिस्तस्य चतुरस्त्रतया स्थिता।
अधर्मादिचतूरूपा चतूरेखात्मतां गता॥

एवं चक्रं समुत्पन्नमथ तत्त्वात्मतां श्रुणु।
शिवशक्त्यात्मकं बीजं मध्यस्थं स्यात् त्रिकेणकम्॥

सदाशिवेशविद्याख्यं मायामारभ्य चाष्टकम्।
प्रकृत्यन्तं चाष्टकोणमहङ्करात् त्रयं तथा॥

श्रोत्रादिपञ्कं देवि चाष्टपत्रतया स्थितम्।
कर्मन्द्रियं तद्विषज्ञयस्तन्मात्रं स्थूलमेव च॥

भूपुरं चेति देवेशि चक्रं तत्वात्मकं भवेत्।
आत्मविद्याशिवाख्यं हि तत्त्वमुक्तं वरानने॥

प्रकृत्यादिधरण्यन्तं मायादिपुरुषान्तकम्।
शिवादिशुद्धविद्यान्तं बीजत्रयतया स्थितम्॥

इच्छाज्ञानक्रियाख्यं च तथावस्थात्रयात्मकम्।
यद्यल्लोके त्रिगुणितं सर्वकारणभावतः॥

बीजरूपपुरोभावात् त्रिपुरेति प्रकीर्तिता।
एवं विद्याचक्रजगदात्मनामैक्यवेदनम्॥

(This Tantra compiled by Maheśvarānanda-nātha has been brought out in the Yoga-tantra-series of Sampūrnānanda Sanskrit University, Vāraṇāsi, ed. by Āchārya-Raghunātha-miśra, 1985)



Rs. 3000/-

[illegible]

Vidyalankara, Sastra-Chudamini, Sangita-Kalaratna, Professor Saligrama Krishna Ramachandra Rao, is a well-known scholar who combines traditional learning with modern research. Well versed in Sanskrit, Pali, Ardhmagadhi and several modern Indian languages and acquainted with Tibetan and some European languages, he has written extensively on Vedanta, Buddhism, Janism, Indian Culture, Art and Literature.

In his professional career, however, he was a Professor of Psychology. He has headed the Department of Clinical Psychology in the National Institute of Mental Health and Neuroscience's, Bangalore and the Department of Indian Culture in the Collision College Study Center of the University of the Pacific (U.S.A.) He was the senior associate of National Institute of Advanced Studies (Indian Institute of Science), Bangalore, and Guest Faculty, Indian Institute of Management, Bangalore and member of the Governing Council of TTD (SVCL Research Center), Tirupati. He has been member of Karnataka State Lalitha Kala Academy and Sangita Nritya Academy and Sangita Nritya Academy; he has served on the Agama Board (Govt. of Karnataka). He is President of Silpa-Kala Pratisthana. The Govt. of Karnataka has honored him with the 1986 Rajyotsava Award. He has received awards from Lalita-Kala Academy and Sangita Nritya Academy. He has been Awarded the Veda-Sanman for the year 2000 by the Govt. of India (Ministry of HRD, Sandipani Mahavidhyalaya, Ujjain). He has written more than Sixty Books in Kannada, a Play in Sanskrit, and a Pali Commentary on a Buddhist classic. One of his books on Iconography in Kannada has won the State Sahitya Academy Award, as also another of his Book on the Tirupati Temple.





Published by
Sri Satguru Publications
A Division of
Indian Books Centre
24/4, Shakti Nagar, Near Dena Bank, Delhi-110007